# संस्कृत भारती

(मैट्रिक कक्षाओं के लिए)

पंजाब स्कूल शिक्षा बोर्ड

साहिबज़ादा अजीत सिंह नगर

© पंजाब सरकार

**संस्करण : 2017-18 .................... 20,000 प्रतियाँ**

All rights, including those of translation, reproduction and annotation etc., are reserved by the Punjab Government.

| | |
|---|---|
| *सम्पादक* | **मनजीत सिंह** |
| | **कृष्ण दत्त शास्त्री** |
| *संशोधक* | **डॉ॰ जीत सिंह खोखर** |
| | **वेद प्रकाश शास्त्री** |
| | **वीरेन्द्र कुमार शर्मा** |
| | **पवन कुमार मलकोटी** |

**चेतावनी**

1. कोई भी एजेंसी-होल्डर अधिक पैसे लेने के उद्देश्य से पाठ्य-पुस्तकों पर जिल्दबन्दी नहीं कर सकता। (एजेंसी-होल्डरों के साथ हुए समझौते की धारा नं. 7 के अनुसार)
2. पंजाब स्कूल शिक्षा बोर्ड द्वारा मुद्रित तथा प्रकाशित पाठ्य-पुस्तकों का जाली प्रकाशन, जमाखोरी या बिक्री आदि करना भारतीय दंड प्रणाली के अन्तर्गत ग़ैरकानूनी है।
(पंजाब स्कूल शिक्षा बोर्ड की पाठ्य-पुस्तकें बोर्ड के 'वाटर मारक' वाले कागज़ के ऊपर ही मुद्रित की जाती हैं।)

**मूल्य : ₹ 32.00**

**सचिव,** पंजाब स्कूल शिक्षा बोर्ड, विद्या भवन, फेज़-8, साहिबज़ादा अजीत सिंह नगर-160062 द्वारा प्रकाशि। एवं मैसर्स नोवा पब्लिकेशन्ज़, सी-51, फोकल प्वाइंट एक्सटेन्शन, जालन्धर द्वारा मुद्रित।

# प्राक्कथन

पंजाब स्कूल शिक्षा बोर्ड का प्रमुख उत्तरदायित्व स्कूल स्तरीय सभी विषयों के पाठ्यक्रम तैयार करना, उन पाठ्यक्रमों के अनुसार पाठ्य-पुस्तकें तैयार करना तथा उन्हें नवीन शिक्षा नीति के अनुसार संशोधित करना है। संशोधित पाठ्यक्रमों के आधार पर विभिन्न विषयों की पाठ्य-पुस्तकें तैयार की जा रही हैं। इसी कार्यक्रम के अन्तर्गत प्रवेश वर्ष 1998 से संस्कृत विषय की सभी पाठ्य-पुस्तकों के नवीनीकरण की क्रमिक योजना बनाई गयी है ।

छठी, सातवीं और आठवीं श्रेणी की पाठ्य-पुस्तकों का नवीनीकरण पहले ही क्रमशः किया जा चुका है। हस्तीय पुस्तक इसी शृंखला की अगली कड़ी है। यह पुस्तक प्रवेश वर्ष 2003 से नौवीं और दसवीं श्रेणियों के लिए संशोधित पाठ्यक्रम के अनुसार तैयार की गयी है। पुस्तक को विद्यार्थियों के मानसिक स्तरानुरूप बनाने का यथेष्ट प्रयत्न किया गया है। विद्यार्थियों की सुविधा के लिए पाठ्यक्रम में निर्धारित व्याकरण तथा रचनात्मक भाग को पाठ्य पुस्तक में सम्मिलित किया गया है तथा शब्द कोश को पाठ्य-पुस्तक का अंग बना दिया गया है।

आशा की जाती है कि यह पुस्तक विद्यार्थियों तथा अध्यापकों के लिए लाभदायक सिद्ध होगी। फिर भी पुस्तक को और अधिक लाभदायक बनाने के लिए विद्वानों द्वारा दिए गए सुझाव, बोर्ड द्वारा सादर स्वीकार किए जायेंगे ।

**चेयरपर्सन**

पंजाब स्कूल शिक्षा बोर्ड

# विषय-सूची


| क्रमांक | विषय | पृष्ठांक |
|---|---|---|
| प्रथमः पाठः | प्रार्थना | 1 |
| द्वितीयः पाठः | परीक्षितं यः कुरुते, स शोभते | 3 |
| तृतीयः पाठः | **दूत-वाक्यम्** | 5 |
| चतुर्थः पाठः | लोकोक्तयः | 8 |
| पञ्चमः पाठः | न गङ्गदत्तः पुनरेति कूपम् | 10 |
| षष्ठः पाठः | महात्मा गांधीः | 13 |
| सप्तमः पाठः | नीति श्लोकाः | 15 |
| अष्टमः पाठः | पत्रम् | 17 |
| नवमः पाठः | साहसिकः वीरभद्रः | 20 |
| दशमः पाठः | चित्र-श्लोकाः | 22 |
| एकादशः पाठः | चित्रकर्णः उष्ट्रः | 24 |
| द्वादशः पाठः | रुप्यकस्य आत्मकथा | 27 |
| त्रयोदशः पाठः | सुभाषितानि | 30 |
| चतुर्दशः पाठः | **श्री गुरू नानक देवः** | 33 |
| पञ्चदशः पाठः | भीष्म-प्रतिज्ञा | 36 |
| षोडशः पाठः | हितोपदेशः | 38 |
| सप्तदशः पाठः | सूर्य-परिवारः | 40 |
| अष्टादशः पाठः | तुलां लोहेन घटितां यत्र खादन्ति मूषिकाः | 43 |
| नवदशः पाठः | सुप्रभातम् | 46 |
| विंशः पाठः | संस्कृतस्य महत्त्वम् | 48 |
| एकविंशः पाठः | स्वामी रामतीर्थः | 51 |
| द्वाविंशः पाठः | गीतामृतम् | 54 |
| त्रयोविंशः पाठः | महाराजा रणजीत सिंहः | 57 |
| चतुर्विंशः पाठः | कश्मीर यात्रा | 60 |
| पञ्चविंशः पाठः | मनु-वचनानि | 62 |
| षड्विंशः पाठः | विज्ञानस्य चमत्काराः | 64 |
| सप्तविंशः पाठः | भारत-कोकिला सरोजिनी | 66 |
| अष्टाविंशः पाठः | यक्ष-युधिष्ठिरयोः संवादः | 69 |
| नवविंशः पाठः | भारतम् | 71 |
| त्रिंशः पाठः | अन्त्याक्षरी | 73 |
| | व्याकरण भागः | 77 |
| | अनुवाद-भाग | 133 |
| | शब्द-कोषः | 153 |

# संक्षेप-सूची

| | |
|---|---|
| अ॰ | अव्यय |
| अदा॰ | अदादिगण |
| अव्ययी॰ | अव्ययीभाव समास |
| उ॰ | उत्तम पुरुष |
| ए॰ | एकवचन |
| कर्म॰ | कर्मधारय समास |
| क्रि॰ वि॰ | क्रिया विशेषण |
| क्रया॰ | क्रयादिगण |
| चुरा॰ | चुरादिगण |
| जुहो॰ | जुहोत्यादिगण |
| तत्पु॰ | तत्पुरुष समास |
| तना॰ | तनादिगण |
| तुदा॰ | तुदादिगण |
| दिवा॰ | दिवादिगण |
| द्वन्द्व॰ | द्वन्द्व समास |
| द्वि॰ | द्विवचन |
| नपुं॰ | नपुंसकलिंग |
| पुं॰ | पुंलिंग |
| प्र॰ | प्रथम पुरुष |
| ब॰ | बहुवचन |
| बहु॰ | बहुब्रीहि समास |
| भ्वा॰ | भ्वादिगण |
| म॰ | मध्यम पुरुष |
| रुधा॰ | रुधादिगण |
| वि॰ | विशेषण |
| सं॰ | संख्यावाची शब्द |
| सर्व॰ | सर्वनाम |
| स्त्री॰ | स्त्रीलिंग |
| स्वा॰ | स्वादिगण |

## प्रथमः पाठः

# प्रार्थना

प्रभो ! देश-रक्षा-बलं मे प्रयच्छ।
नमस्तेऽस्तु देवेश! बुद्धिं च यच्छ॥
सुताः ते वयं शूर-वीराः भवाम।
गुरून् मातरं चापि तातं नमाम॥

घृणायाः तु नाशः सदैक्यस्य वासः।
भवेद् भारते स्नेह-वृत्तेः विकासः॥
प्रजातांत्रिकं राज्यम् अस्माकमत्र।
सदा वर्धतां मंगलायात्र तत्र॥

न कोऽपि क्षुधा-पीडितो मानवः स्यात्।
न रुग्णो न नग्नो न दीनश्च तस्मात्॥
न शिक्षा-विहीनञ्च पश्याम कञ्चित्।
प्रभो! भारतस्योन्नतिः स्यात् कथञ्चित्॥

सुखैः पूर्णमेतद् भवेद् भारतं मे।
भवेदत्र नित्यं प्रभोऽनुग्रहस्ते॥
इयं कामना प्रार्थनैषा विधातः।
इमां पूरयैकां अये लोकमातः॥

### शब्दार्थः

मे = मुझे, मेरा
तातम् = पिता को
स्नेह-वृत्तेः = प्रेम भाव का
ते = तुझे, तेरा
सुताः = पुत्र, पुत्रियाँ
ऐक्यस्य = एकता का

वर्धताम् (वृध्)=बढ़े
इयम् = यह
क्षुधा-पीडित: =भूख से दु:खी

प्रजातान्त्रिकम् = जनता का
कथञ्चित् = किसी तरह
इमाम् = इसको
लोकमात: = मातृभूमि

## अभ्यास

1. प्रार्थना का सरलार्थ हिन्दी में लिखो।
2. सन्धिच्छेद करो
   देवेश, नमस्ते, सदैक्यस्य, कोऽपि, पूरयैकाम्, प्रार्थनैषा।
3. संस्कृत में उत्तर लिखो–
   (क) बालक: प्रथमं किम् प्रार्थनां करोति?
   (ख) भारतस्य सुता: कीदृशा: भवेयु: ?
   (ग) अन्तिमे पदे का कामना अस्ति?

✧✧✧✧

## द्वितीय: पाठ:

# परीक्षितं य: कुरुते, स शोभते

कस्मिंश्चित् वनप्रदेशे खरनखर: नाम सिंह: प्रतिवसति स्म। स: कदाचित् इतस्तत: परिभ्रमन् क्षुधया व्याकुल: न किंचित् अपि सत्त्वं प्राप्नोत्। तत: च सायंकाले महतीं गिरीगुहाम् एकां प्राप्य प्रविष्ट: स : अचिन्तयत्—''नूनम् एतस्यां गुहायां रात्रौ क: अपि जन्तु: आगमिष्यति। तत् प्रच्छन्न: भूत्वा तिष्ठामि।''

एतस्मिन् अन्तरे गुहाया: स्वामी दधिपुच्छ: नाम शृगाल: आगच्छत्। स: च अपश्यत् यत् सिंहस्य-पद-पंक्ति: गुहायां प्रविष्टा न च निष्क्रान्ता इति। तत: च स: अचिन्तयत्— ''अहो, विनष्ट: अस्मि। नूनम् अस्याम् अन्तर्गत: सिंह: अस्ति। तत् किं करोमि ?'' कथं ज्ञास्यामि ?

एवं विचिन्त्य स: द्वारस्थ: फूत्कर्तुम् आरभत- ''अहो बिल, अहो बिल'' इति। एवम् उक्त्वा तूष्णींभूय पुन: अपि स: तथैव अवदत्— ''भो:, किं न स्मरसि मया सह कृतं समयं यत् बाह्यात् समागत: अहं त्वां वदिष्यामि त्वं च मां प्रतिवदिष्यसि इति ? यदि मां न प्रतिवदसि तत् अहम् अन्यद् बिलं गच्छामि।''

अथ तत् श्रुत्वा सिंह: अचिन्तयत्—''नूनम् एषा गुहा अस्य समागतस्य सदा आह्वानं करोति। परम् अद्य मद् भयेन न किंचित् वदति। तत् अहम् अस्य आह्वानं करोमि, येन तदनुसारेण प्रविष्ट: अयं मम भोज्यतां गच्छति।''

एवं विचार्य सिंह: तस्य आह्वानम् अकरोत्। अथ सिंह-शब्देन सा गुहा प्रतिध्वनिसम्पूर्णा अभवत्, अन्यान् अपि च अरण्य-जीवान् अत्रासयत्। शृगाल: अपि पलायमान: इदम् अवदत्—

परीक्षितं य: कुरुते स शोभते<br>
न शोभते य: कुरुतेऽपरीक्षितम्।<br>
वनेऽत्र संस्थस्य समागता जरा<br>
बिलस्य वाणी न कदापि मे श्रुता॥

## शब्दार्थ:

इतस्ततः = (इतः+ततः) इधर-उधर
सत्त्वम् = पशु को
परीक्षितम् = (परि+ईक्षितम्) अच्छी प्रकार से देखे हुए अथवा जाँचे हुए (काम) को
समयम् = प्रतिज्ञा या नियम को
गुहायाः = गुफा का
प्रच्छन्नः = छिपा हुआ
ज्ञास्यामि = जानूँगा, पता करूँगा

## अभ्यास

१. हिन्दी में उत्तर लिखो :-

(क) सिंह ने गुफा में प्रवेश क्यों किया?

(ख) गुफा किसका आह्वान करती थी?

(ग) इस कथा से हमें क्या शिक्षा मिलती है?

२. सन्धिच्छेद करो—

इतस्ततः, तथैव, तदनुसारेण, वनेऽत्र, कदापि।

३. रेखांकित पदों में यथानिर्दिष्ट परिवर्तन करो—

(क) मद् भयेन सा न किंचित् <u>वदति</u> (लङ् में)

(ख) तत्र प्रच्छन्नः भूत्वा <u>तिष्ठामि</u>। (लृट् में)

(ग) नूनं गुहायाम् अन्तर्गतः <u>सिंहः</u> अस्ति। (स्त्रीलिंग में)

४. रिक्त स्थानों की पूर्ति करो :—

(क) रात्रौ कः अपि ............... आगमिष्यति।

(ख) बाह्यात् समागतः ............... त्वां वदिष्यामि।

(ग) तत् श्रुत्वा ............... अचिन्तयत्।

५. संस्कृत में उत्तर लिखो—

(क) वनप्रदेशे कः प्रतिवसति स्म?

(ख) गुहायाः स्वामी कः आसीत्?

(ग) कः न शोभते?

✧✧✧✧

## तृतीय: पाठ:

# दूत-वाक्यम्

**कञ्चुकी:—** जयतु जयतु महाराज । एष खलु पाण्डवशिविराद् दौत्येन आगत: पुरुषोत्तमो नारायण: ।

दुर्योधन:— मा तावद् भो बादरायण, । किं किं स: कंसभृत्य: तव पुरुषोत्तम: ? स गोपालक: तव पुरुषोत्तम: ? आ ! सत्वरं निर्गच्छ, मम पुरत: ।

कञ्चुकी:— प्रसीदतु प्रसीदतु महाराज: । दूत: प्राप्त: केशव: ।

दुर्योधन:— भो:, सम्यक् कथयसि साम्प्रतम् । भो भो राजान: । योऽस्य केशवस्य कृते प्रत्युत्थास्यति, तमहं दण्डयिष्यामि । बादरायण ! प्रवेशय अधुना तं दूतम् ।

कञ्चुकी:— यदाज्ञापयति महाराज: । इति निर्गच्छति ।

दुर्योधन:— वयस्य कर्ण । अद्य कृष्णमति: स कृष्ण: पाण्डवानां दौत्येन अत्रागच्छति । युधिष्ठिरस्य नारी-मृदूनि वचनानि श्रोतुं त्वमपि कर्णौ सज्जय ।

(तत: प्रविशति वासुदेव: कञ्चुकी च)

वासुदेव:— (स्वगतम्) कथं कथं मां विलोक्य संभ्रान्ता: सर्वे राजान: ? (प्रकाशम्) अलमलं **संभ्रमेण** । नूनं स्वैरमासतां भवन्त: ।

दुर्योधन:— (स्वगतम्) कथं कथं केशवं दृष्ट्वा संभ्रान्ता: सर्वे नृपा: ? (वासुदेवं प्रति) भो दूत ! एतद् आसनमास्यताम् ।

वासुदेव:— आचार्य आस्यताम् । श्रीभीष्मप्रमुखा राजान: ! स्वैरमासतां श्रीमन्त: । वयम् अपि उपविशाम: ।

दुर्योधन:— भो दूत । धर्मात्मज:, वायुसुतो भीम:, इन्द्रपुत्रो मे भ्राता अर्जुन:, विनीतौ च तौ नकुलसहदेवौ, कच्चित् सन्ति सर्वे कुशलिन: ?

वासुदेव:— सदृशमेतद् गान्धारीपुत्रस्य । कुशलिन: सर्वे, भवतो राज्ये शरीरे च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति **युधिष्ठिरादय: पाण्डवा:**

अनुभूतं महद् दुःखं, सम्पूर्णः समयश्च सः।
अस्माकमपि धर्म्यं यद् दायाद्यं तद् विभज्यताम्॥

दुर्योधनः— कथं कथं दायाद्यमिति? देवात्मजास्ते नैवर्हन्ति दायाद्यम्।

वासुदेवः— भो राजन्। मा मैवम्। एवं परस्परविरोधस्य विवर्धनेन कुरुकुलं शीघ्रमेव नामशेषं भविष्यति। अत एव क्रोधं वैरञ्च अपहाय तदेव भवान् कर्तुमर्हति यत्त्वां युधिष्ठिर- प्रमुखाः प्रणयात् कथयन्ति।

दुर्योधनः— मनुष्याणां देवात्मजैः सह कथं बन्धुता भवेत्? भवन्तस्तु वारं-वारं एवं कथयन्ति। अस्य विषयस्य तु कथाऽपि न कर्तव्या।

वासुदेवः— भो दुर्योधन! न जानीषे तावदर्जुनस्य पराक्रमम् किं बहुना—

दातुमर्हसि मद् वाक्याद् राज्यार्धं धृतराष्ट्रज!
अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः॥

दुर्योधनः— कथं कथं हरिष्यन्ति हि पाण्डवाः? भो पुरुष-वचनदक्ष! शृणु तावत्- यदि युद्धे भीमरूपो मारुतोऽपि मां प्रहरति, साक्षाद् अर्जुनरूपेण च इन्द्रश्च प्रहरति, तथापि त्वद् वचोभिः तृणा[illegible] न दास्ये किं पुनः राज्यार्धम् ।

वासुदेवः एवमेव अस्तु। न वयम् अनुक्तसन्देशाः गन्तुम् इच्छामः। तदा आकर्ण्यतां युधिष्ठिरस्य संदेश- अरे शठ! त्वत् कारणात् कुरुवंशः शीघ्रं एव नशिष्यति। भो भो राजानः !गच्छामः वयं तावत् । (इति निर्गच्छति)

(भासकृत 'दूतवाक्य' नाटक से)

## शब्दार्थः

दौत्येन = दूत के रूप में
प्रत्युत्थास्यति = अभ्यागत के स्वागत के लिय उठना
बादरायणः = व्यास
आस्यताम् = बैठिए
सत्वरम्= शीघ्र
साम्प्रतम्= अब
सम्भ्रमेण = घबराहट से
अनामयम्= स्वस्थ

दायाद्यम्= पैतृक सम्पत्ति
नामशेषम्= नाम ही शेष
दास्ये= दूँगा
विवर्धनेन= बढ़ाने से
गाम्= पृथ्वी को

## अभ्यास

१. हिन्दी में उत्तर लिखो :—

(क) दुर्योधन के पास दूत के रूप में कौन गया ?

(ख) श्री वासुदेव को देखकर राजाओं पर क्या प्रभाव पड़ा?

(ग) श्री वासुदेव ने पाण्डवों का क्या सन्देश दिया?

२. रिक्त स्थानों की पूर्ति करो:—

(क) ............... निर्गच्छ मम पुरतः।

(ख) आगतः पुरुषोत्तमः ............... ।

(ग) कथं कथं हरिष्यन्ति हि ............... ।

३. अव्ययों का संस्कृत वाक्यों में प्रयोग करो:—

कृते, सत्वरम्, सम्यक्, अधुना, साम्प्रतम्

४. उपसर्ग अलग करो:-

प्रहरति, सम्पूर्णः, अनुभूतम्, प्रसीदतु, निर्गच्छति।

✧✧✧✧

## चतुर्थः पाठः

# लोकोक्तयः

१. अति सर्वत्र वर्जयेत्।

२. अर्धो घटो घोषमुपैति नूनम्।

३. आचारः परमो धर्मः।

४. उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।

५. उपदेशो हि मूर्खाणां प्रकोपाय, न शान्तये।

६. उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।

७. काव्य-शास्त्र-विनोदेन कालो गच्छति धीमताम्।

८. गते शोको न कर्त्तव्यः।

९. चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।

१०. जननी जन्म-भूमिश्च स्वर्गादपि गरीयसी।

११. न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

१२. परोपकाराय सतां विभूतयः।

१३. बुभुक्षितः किं न करोति पापम्?

१४. यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।

१५. वरम् एको गुणी पुत्रो, न च मूर्ख-शतान्यपि।

१६. विनाश-काले विपरीत-बुद्धिः।

१७. सत्यमेव जयते, नानृतम्।

१८. सर्वाः आशाः मम मित्रं भवन्तु।

१९. सुखं हि दुःखानि अनुभूय शोभते।

२०. हितं मनोहारि च दुर्लभं वचः।

## शब्दार्थः

वर्जयेत् = छोड़ना चाहिए
घोषम् = ध्वनि को, आवाज़ को
यच्छक्यम् = (यत्+शक्यम्) जो किया जा सकता है।
चक्रवत् = पहिये के समान
परिवर्तन्ते = बदल जाते हैं
गरीयसी = अधिक, महान्, बढ़कर
ब्रूहि = (वच् लोट्, म. ए.) बोलो
आशा = दिशाएं
धीमताम् = बुद्धिमानों का

## अभ्यास

१. सन्धिच्छेद करो—

उपैति । तच्छक्यम्। स्वर्गादपि। भूमिश्च।

२. अव्ययों का संस्कृत वाक्यों में प्रयोग करो—

सर्वत्र, नूनम्, अति, मा, पुरतः।

३. कोष्ठक में दिए गए शब्दों में से उपयुक्त शब्द चुनकर रिक्त स्थानों की पूर्ति करो—

(क) सत्यमेव .................. नानृतम् (भवति, जयते, शोभते)

(ख) न हि सुप्तस्य सिंहस्य .................. मुखे मृगाः (पश्यन्ति, प्रविशन्ति, गच्छन्ति)

(ग) सुखं हि .................. अनुभूय शोभते। (सत्यं, शोकं, दुःखानि)

४. निम्नलिखित भावों से सम्बन्धित सूक्तियाँ लिखो :

| भाव | सूक्ति |
|---|---|
| मातृभूमि का गौरव | |
| आलस्य | |
| भूख और पाप | |
| उपाय और पराक्रम | |
| सुख-दुःख | |

✧✧✧✧

## पंचमः पाठः

# न गङ्गदत्तः पुनरेति कूपम्

कस्मिंश्चित् कूपे गङ्गदत्तः नाम मण्डूक- राजः प्रतिवसति स्म। सः कदाचित् दायादैः उद्वेजितः अरघट्ट-घटीम् आरुह्य बहिः आगच्छत्। सः अचिन्तयत् ''कथं तेषां दायादानां प्रत्यपकारं करोमि?'' तदैव सः बिले प्रविशन्तं कृष्ण- सर्पम् अपश्यत्। तं दृष्ट्वा सः पुनः अचिन्तयत्—''एनं सर्पं तत्र कूपे नीत्वा सकलानां दायादानाम् उच्छेदं करोमि।'' एवं आलोच्य सः तस्य बिल-द्वारं गत्वा तम् आह्वयत्— ''एहि, एहि, प्रियदर्शन।''। तत् श्रुत्वा सर्पः अचिन्तयत्— ''यः एषः माम् आह्वयति सः वाण्या स्वजातीयः न भवति।'' अथ सः तम् अपृच्छत्- ''भोः कः भवान्?'' सः अवदत् — ''अहं गङ्गदत्तःनाम मण्डूक-राजः तव सकाशं मित्रतार्थम् आगतः।'' सर्पः अवदत्— ''अश्रद्धेयम् एतत् यत् तृणानाम् अनलेन सह संगमः।'' गङ्गदत्तः आह- ''भोः, सत्यं स्वभाव-वैरी त्वम् अस्माकम्, परं दायादैः अपमानितः अहं प्राप्तः तव सकाशम्।''

एतत् श्रुत्वा सर्पः व्यचिन्तयत्—''अहं तावत् वृद्धः, कदाचित् कथंचित् मूषिकम् एकं प्राप्नोमि। तत् एषः कुलाङ्गारः इमं सुखावहं जीवनोपायं मां दर्शयति। तत् गत्वा तान् मण्डूकान् भक्षयामि।''

एवं आलोच्य सः तम् अवदत्—''भोः गङ्गदत्त, यदि एवं तत् अग्रे भव, येन तत्र गच्छावः।'' गङ्गदत्तः अवदत्—''भोः प्रियदर्शन अहं त्वां सुखोपायेन तत्र नेष्यामि, परं त्वया मम परिजनः रक्षणीयः। यान् अहं तव दर्शयिष्यामि केवलं ते एव भक्षणीयाः'' इति। सर्पः 'एवं भवतु' इति उक्त्वा बिलात् निष्क्रम्य तेन एव सह तस्य आलयम् अगच्छत्।

ततः गङ्गदत्तः कृष्णसर्पं तान् दायादान् अदर्शयत्। सर्पः तान् क्रमेण अखादत्। अथ शत्रु- मण्डूकानाम् अभावे जाते सर्पः अकथयत् ''भद्र: निश्शेषिताः ते रिपवः, तत् मण्डूकम् एकैकं स्ववर्गीयं प्रयच्छ। अन्यथा सर्वान् अपि खादिष्यामि।'' अथ भीतः गङ्गदत्तः नित्यम् एकैकं सुहृदं तस्मै अयच्छत्। सः अपि सर्वान् तान् शनैः शनैः भक्षयित्वा तस्य परोक्षे कदाचित् गङ्गदत्तस्य पत्नीं सुतं च अपि अभक्षयत्। केवलम् एकः गङ्गदत्तः अवशिष्टः।

ततः प्रियदर्शनः अभणत्- ''भोः गङ्गदत्त, बुभुक्षितः अहम्। दीयतां मे किंचित् भोजनं यतः त्वं माम् अत्र आनयः।'' स अवदत्- ''भोः मित्र, न त्वया अत्र विषये का अपि चिन्ता कार्या। यदि मां प्रेषयसि ततः अन्यस्मिन् कूपे स्थितान् मण्डूकान् अपि विश्वास्य अत्र आनयामि। सर्पः आह- ''एवं क्रियताम्'' इति।

सः अपि तत् श्रुत्वा अरघट्ट -घटीम् आश्रित्य तस्मात् कूपात् बहिः आगतः। अथ चिरम् अनागते गङ्गदत्ते प्रियदर्शनः अन्य कोटर-वासिनीं गोधाम् अभणत्- ''क्रियतां स्तोकं साहाय्यम्। यतः चिर-परिचितः ते गङ्गदत्तः, तत् बहिः गत्वा तम् अन्विष्य मम सन्देशं कथय- यदि अन्ये मण्डूकाः न आगच्छन्ति, तत् आगच्छतु एकाकी एव भवान्। अहं भवता विना न अत्र वस्तुं शक्नोमि इति।

गोधा अपि तद्वचनात् गङ्गदत्तम् अन्विष्य अवदत्- ''भद्र गङ्गदत्त, सः तव सुहृत् प्रियदर्शनः तव मार्गं प्रतीक्षमाणः तिष्ठति। तत् शीघ्रम् आगम्यताम्।'' तत् श्रुत्वा गङ्गदत्तः अकथयत्—

बुभुक्षितः किं न करोति पापं?
क्षीणा नरा निष्करुणा भवन्ति॥
आख्याहि, भद्रे, प्रियदर्शनस्य,
न गङ्गदत्तः पुनरेति कूपम्॥

## शब्दार्थः

पुनरेति = (पुनः +एति) दोबारा आता है
दायादः = पैतृक-सम्पत्ति में हिस्सेदार, शरीक
अरघट्ट-घटीम् = रहट की घड़िया को
प्रत्यपकारम् = बदले में बुरे काम को
निःशेषिता = शेष नहीं रहने दिए, नष्ट कर दिये
अवशिष्टः = बच गया
आश्रित्य = सहारा लेकर
स्तोकम् = थोड़ा सा
अन्विष्य = ढूँढ़ कर
तद्वचनात् = उनके कहने से
एहि = (आ √ इ, लोट् म.ए.)(तू) आ
आलोच्य = (आ√ लोच्, क्त्वा >ल्यप्) सोचकर
आह्वयति = (आ √ ह्वे, लट् प्र. ए.) बुलाता है
मित्रतार्थम् = (मित्रता+अर्थम्) मित्रता के लिए
अश्रद्धेयम् = विश्वास न करने योग्य
कुलाङ्गार = वंश के लिए अंगार रूप अर्थात् कुलनाशक
परिजन = परिवार के सदस्य एवं अन्य रिश्तेदार

बुभुक्षित: = भूखा
एकाकी = अकेला

प्रतीक्षमाण: = प्रतीक्षा करता हुआ

## अभ्यास

१. हिन्दी में उत्तर लिखो
(क) बिल में जाते हुए साँप को देखकर गङ्गदत्त ने क्या कहा?
(ख) गङ्गदत्त के पुत्र और पत्नी को खाने के बाद साँप ने क्या कहा?
(ग) सांप ने गोह द्वारा क्या संदेश भेजा?
(घ) गङ्गदत्त ने गोह को क्या उत्तर दिया?

२. सन्धिच्छेद करो:-
जीवनोपायम्, एकैकम्, व्यचिन्तयत्, मित्रतार्थम्

३. कोष्ठक में से उचित शब्द चुनकर खाली स्थान भरो:-
(क) न तृणानाम्............ सह संगम: (जलेन, वायुना, अनलेन)
(ख) मण्डूकराज: बिले प्रविशन्तं ..........अपश्यत्।
(गोधाम्, सर्पम्, नकुलान्)
(ग) अहम् अन्यान् मण्डूकान् अपि अत्र-----
(आनयसि, आनयामि, आनयाम:)

४. निम्नलिखित वाक्यों को शुद्ध करो:-
(क) अहं तव सह न गमिष्यामि।
(ख) गोधा कूपेन बहि: आगच्छत्।
(ग) संस्कृत-पुस्तकं मां प्रयच्छ।

५. संस्कृत में उत्तर लिखो:-
(क) कूपे क: प्रतिवसति स्म?
(ख) गङ्गदत्त: बिले प्रविशन्तं कम् अपश्यत्?
(ग) सर्प: कान् अखादत्?

✧✧✧✧

## षष्ठ: पाठ:

# महात्मा गांधी:

महात्मन: गान्धिन: नाम को न जानाति। महापुरुष: अयं न केवलं भारतस्य हितम् अचिन्तयत् अपितु अखिलस्य विश्वस्य कल्याणार्थं प्रयत्नम् अपि अकरोत्। यद्यपि इदानीं स: भौतिक-देहेन अस्माकं मध्ये नास्ति तथापि यश: शरीरेण जनानां मानसमन्दिरे तिष्ठति। सत्यम्, अहिंसा, लोकसेवा च रत्नत्रयम् अस्य जीवनस्य प्रधानं उद्देश्यम् आसीत्। एतादृशै: श्रेष्ठै: गुणै: एव स: विश्ववन्दनीय: अभवत्।

गान्धी-महोदय: 2 अक्तूबर 1869 तमे ईसाब्दे पोरबन्दर-नगरे अजायत्। तस्य पिता कर्मचन्द: गान्धी राजकोट रियासतस्य दीवान: आसीत्। तस्य माता पुतलीबाई सर्वगुणसम्पन्ना धर्मरता नारी आसीत्।

गान्धी महोदय: बाल्याद् एव सदाचारम् अपालयत्। पूर्वम् अयं पोरबन्दरे शिक्षाम् अलभत्। तत: अयम् उच्च-शिक्षां प्राप्तुम् इंग्लैण्डदेशम् अगच्छत्। तत्र श्रीगान्धी कदापि न मदिराम् अपिबत् न च मांसम् अखादत्। विधि-शिक्षां प्राप्य अयं महानुभाव: भारतं प्रत्यागच्छत्। तत: स: स्वदेशे मुम्बई-नगरे विधिवक्ता रूपेण कार्यम् अकरोत्। तथा च दक्षिण -अफ्रीका देशे स: भारतीयान् संगठितान् अकरोत्। तेषां जीवनस्तरम् उन्नतं कर्तुं प्रयत्नम् अकरोत्।

भारतवर्षे अपि अयं महात्मा स्वतंत्रतायै भारतीयान् प्रेरितवान्। समये-समये स: 'असहयोग आंदोलनं, नमक-सत्याग्रहं, भारतं मुञ्च' च इति आह्वानम् अकरोत्। तस्य प्रयत्नेन 1947 तमे ईसाब्दे अगस्त मासस्य पञ्चदश तारिकायां भारतं स्वतन्त्रम् अभवत्।

स: अछूत-उद्धारक:, ग्रामोद्योगस्य प्रेरणापुञ्ज:, स्वदेशीयानां वस्तूनां प्रचारक:, राष्ट्रनायक: च आसीत्। धन्योऽयम् महापुरुष: य: जीवन-पर्यन्तम् मानवसेवा-व्रतम् आचरत्। अन्तेऽपि स: तदर्थम् एव 1948 तमे ईसाब्दे प्राणान् अत्यजत्।

### शब्दार्थ:

कल्याणार्थम् = कल्याण के लिए　　धर्मरता = धर्म में लीन

| | |
|---|---|
| विधिवक्ता = वकील | विधिशिक्षा = वकालत |
| प्रेरितवान् = प्रेरित किया | मुञ्च = छोड़ो। |
| आह्वानम् अकरोत् = बुलावा दिया। | तारिकायाम् = तिथि में |
| अछूत-उद्धारक: = अछूतों का उद्धार करने वाले | प्रेरणा पुंज: = प्रेरणा देने वाले |
| | विश्ववन्दनीय: = संसार के द्वारा पूजनीय |

## अभ्यास

१. हिन्दी में उत्तर **लिखो :-**

(क) महात्मा गांधी का जन्म कब और कहाँ हुआ?

(ख) गांधी जी के जीवन का उद्देश्य क्या था?

(ग) गांधी जी ने कौन-कौन से आंदोलन आरम्भ किए?

२. **रिक्त स्थानों की पूर्ति करो :-**

(क) तस्य पिता ............रियासतस्य दीवान: आसीत्।

(ख) गांधी-महोदय: उच्चशिक्षां प्राप्तुं......... देशम् अगच्छत्।

(ग) गांधी-महोदय: विधिवक्ता-रूपेण.......... अकरोत् ।

३. समस्तपदों का विग्रह करो, समास का नाम भी लिखो-

कल्याणार्थम्। लोकसेवा। सर्वगुणसम्पन्ना। प्रेरणापुंज: । राष्ट्रनायक:।

४. संस्कृत में उत्तर लिखो -

(क) गांधी-महोदयस्य मातु: किम् नाम आसीत्?

(ख) भारतम् कदा स्वतंत्रम् अभवत्?

(ग) महात्मा-गांधी कदा प्राणान् अत्यजत्?

✧✧✧✧

## सप्तमः पाठः

# नीति-श्लोकाः

१. वरं पर्वत-दुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्ख-जनसम्पर्कः सुरेन्द्र-भवनेष्वपि॥

२. सम्पत्सु महतां चित्तं भवत्युत्पल-कोमलम्।
आपत्सु च महाशैल-शिला-संघात-कर्कशम्॥

३. एकेनापि हि शूरेण पादाक्रान्तं महीतलम्।
क्रियते भास्करेणैव परिस्फुरित-तेजसा॥

४. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्ति उद्यम-समो बन्धुः यं कृत्वा नावसीदति॥

५. मालती कुसुमस्येव द्वे गतीह मनस्विनः।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वने एव वा॥

६. दुर्जनः परिहर्तव्यः विद्ययालंकृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयंकरः॥

७. जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशः काये जरा-मरणजं भयम्॥

८. परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम्॥

९. पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते॥

१०. अयं निजः परो वेति गणना लघु चेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥

## शब्दार्थः

उदार चरितानाम् = विशाल हृदय वाले
कुटुम्बकम् = परिवार
परोक्षे = पीछे
वनचरैः = वनवासियों के साथ
महाशैल = विशाल पर्वत
पादाक्रान्तम् = पैरों से दबाया हुआ
भास्करेण = सूर्य के द्वारा
नावसीदति = दुःखी नहीं होता
मूर्ध्नि = सिर पर
परिहर्तव्यः = त्याग देना चाहिए
सुकृतिनः = पुण्यशाली
कवीश्वराः = प्रसिद्ध कवि
जरामरणजम् = बुढ़ापे और मृत्यु का
वसुधा = पृथ्वी
विष कुम्भम् = जहर से भरा हुआ घड़ा
वरम् = श्रेष्ठ
उत्पलकोमलम् = कमल के समान कोमल
कर्कशम् = कठोर
महीतलम् = भूमि
रिपुः = शत्रु
मनस्विनः = विद्वान की
शीर्यते = नष्ट हो जाता है
जयन्ति = विजयी होते हैं
रससिद्धाः = रसों के ज्ञाता
यशः काये = यश रूपी शरीर में
सुभाषितम् = अच्छा वचन

## अभ्यास

१. **हिन्दी में उत्तर लिखो :-**

(क) विपत्ति के समय महापुरुषों का मन कैसा हो जाता है?

(ख) मनस्वी मनुष्य के जीवन की कौन सी दो गतियां होती हैं?

(ग) कैसे मित्र का त्याग कर देना चाहिए?

२. **रिक्त स्थानों की पूर्ति करो :-**

(क) आलस्यं हि .................. शरीरस्थो महान् रिपुः।

(ख) मणिना .................. सर्पः, किमसौ न भयंकरः।

(ग) मूढैः .................. रत्न-संज्ञा विधीयते।

(घ) अयं निजः परो वेति गणना----।

३. सन्धिच्छेद करो-

एकेनापि। पादाक्रान्तम्। गतीह। विद्ययाऽलंकृतोऽपि।

✧✧✧✧

# अष्टमः पाठः

## पत्रम्

प्रकाश- सदनम् २२७/१५,
चण्डीगढ़म्- १६००१५
दिनांक १५-४-२००३

प्रिय भ्रातः विवेक,

माध्यमिक-परीक्षायाः परिणामः अद्य घोषितः अस्ति। तं दृष्ट्वा अत्यन्तं हर्षम् अनुभवामि। त्वं प्रथम-स्तरे उत्तीर्णः, निजे च विद्यालये प्रथमं स्थानं प्राप्तः असि। साधु प्रिय, साधु ! दिष्ट्या वर्धसे।

**प्रिय भ्रातः !** त्वम् अधुना उच्च-विद्यालये प्रवेक्ष्यसि। तत्र त्वम् अस्मात् अपि अधिकतरं साफल्यम् अधिगच्छेः इति इच्छामि। न तव कृते एतत् कठिनम् अस्ति। त्वं योग्यः असि,सर्वं कर्तुं पारयसि। यदि प्रारम्भाद् एव निजां दिनचर्यां नियमेन समयेन च पालयसि, तर्हि त्वं सदा शरीरेण चित्तेन बुद्धया च स्वस्थः तिष्ठसि।

**प्रिय विवेक !** प्रातः सूर्योदयात् पूर्वम् एव उत्थाय, शरीरस्य शौचानि कृत्वा, भ्रमणाय बहिर् उपवनं गच्छ। तत्र तीव्र चलनेन, धावनेन दीर्घ-श्वासैः, योगासनैः च व्यायामः करणीयः। ततः आगत्य अल्पाहारं कृत्वा समये विद्यालयं गच्छ। न कदापि तत्र विलम्बेन गच्छ, न च अपि अनुपस्थितः भव। विद्यालये अध्यापकैः पाठितान् सर्वान् विषयान् ध्यानेन आकर्णय। यत्र अपि पाठे, लेखे वा तव सन्देहः स्यात्, तं निवारयितुम्, अध्यापकं विनयेन पृच्छ।

विद्यालयात् प्रत्यागत्य मध्याह्ने भोजनं कुरु। यः सद्यः पक्वं पथ्यं च भोजनं यथासमयं प्रसादेन च खादति, ग्रासान् भृशं चर्वति, तस्य खादितम् अन्नं सुष्ठु शीघ्रं च परिणमति। अजीर्णता, उदर-पीडा, शीर्ष-वेदना अन्यः वा कश्चिद् रोगः तस्य न भवति। भोजनानन्तरं पुनरपि दन्ताः मंजनेन जलेन च मार्जनीयाः, येन ते स्वच्छाः सुन्दराः स्वस्थाः च तिष्ठेयुः।

ग्रीष्मे क्षणं विश्रम्य, विद्यालये पठितान् पाठान् गृहे पुनः पठ। सर्वेषु विषयेषु

अध्यापकैः आदिष्टं लेखन-कार्यं कुरु। सायंकाले दुग्धं पीत्वा, गच्छ वयस्यैः सह क्रीडाक्षेत्रम्। तत्र पादकन्दुक -क्रीडां, हॉकी- क्रीडां, धावन- कूर्दनादिकं वा शारीरिकं व्यायामं कुरु। विशाले क्षेत्रे स्वच्छे वायौ वयस्यैः सह खेलनेन, व्यायामेन च शरीरं विकसति, चित्तं प्रसीदति, मस्तिष्कं च पुनः नवीभवति।

रात्रौ भोजनान्तरं माता-पितृभ्यां, स्वसृ-भ्रातृभ्यां, अन्यैः च सदस्यैः सह हास्य- विनोदान् आलप, समाचारपत्रं वा वाचय, आकाश- वाणीं वा आकर्णय। ततः पुनरपि पठन- लेखन-कार्यं करणीयम्। सर्वेषु पाठानां सारं प्रश्नोत्तररूपेण यदि लिखसि, तदा सर्वे पाठाः सरलतया कण्ठाग्राः भवन्ति, परीक्षा- दिनेषु च शीघ्रम् आवृत्ताः स्मृताः च भवन्ति। रात्रौ लेखन-कार्येण निद्रा अपि शयनसमयात् पूर्वं न बाधते। रात्रौ लेखनस्य अयम् अधिकः लाभः।

तात, इमां दिनचर्यां यदि चरिष्यसि तदा सफलताम् अधिगमिष्यसि, न अत्र सन्देहः। तव उत्तरम् उत्सुकतया प्रतिपालयिष्यामि।

सद्भावैः स्नेहेन च सहितः,

भवदीयः भ्राता

आलोकः

विवेकः कुमारः,
प्रेम-कुटीरम्, मन्दिर-वीथी,
नाभा द्वारम्,
संगरूर- नगरम् १४८००१

## शब्दार्थः

माध्यमिक = मिडल
स्तर = दर्जा, डिवीज़न
साधु = शाबाश, खूब
दिष्ट्या वर्धसे = तुम्हें बधाई हो
पात्रम् = योग्य
उच्च-विद्यालये = हाई स्कूल में
प्रवेक्ष्यसि = (प्र √ विश्, लट्, म., ए.) तू दाखिल होगा
अधिगन्तुं पारयसि = (तू) प्राप्त कर सकता है
शौचानि = सफाइयाँ
सद्यः पक्वम् = ताज़ा पका हुआ
पथ्यम् = उचित, अनुकूल, हितकर
प्रसादेन = प्रसन्नता से
भृशम् = खूब
परिणमति = पच जाता है

दिनचर्या = रोज़ाना के काम (daily routine)
अजीर्णता = **बदहज़्मी अपचन**
सम्पादयसि = (तू)करता है
आवृत्ता:= दोहराए गए
बाधते = सताती है।

## अभ्यास

१. हिन्दी में उत्तर लिखो—

(क) शरीर को स्वस्थ रखने के कौन से उपाय इस पत्र में बताए गए हैं?

(ख) खुले मैदान में खेलने के क्या लाभ हैं?

(ग) रात को लिखाई का काम करने का क्या अधिक लाभ बताया गया है?

२. रिक्त स्थानों की पूर्ति करो—

अहं अत्यन्तं......................अनुभवामि।

भ्रमणाय बहिर्....................गच्छ।

दन्ता: जलेन मंजनेन..............................।

व्यायामेन...................विकसति।

३. यथानिर्दिष्ट लकार परिवर्तन करो—

(क) त्वम् अधुना उच्च-विद्यालये प्रवेक्ष्यसि। (लट् में)

(ख) त्वं सर्वं कर्तुं पारयसि। (लृट् में)

(ग) त्वम् अध्यापकं विनयेन पृच्छ। (लृट् में)

(घ) ते स्वस्था: तिष्ठेयु:। (लोट् में)

(ङ) स: समये विद्यालयं गच्छति। (विधिलिङ् में)

४. अव्ययों का वाक्यों में प्रयोग करो-

यत्र, शीघ्रम्, सह, तत्र, एव

५. संस्कृत में उत्तर लिखो-

(क) त्वं कस्मिन् स्तरे उत्तीर्ण: ?

(ख) दन्ता: केन मार्जनीया: ?

(ग) व्यायामेन शरीरं कीदृशं भवति?

✧✧✧✧

# नवमः पाठः

# साहसिकः वीरभद्रः

पूर्वस्यां दिशि मणिपुर-नामकः गहनैः वनैः हिंस्रैः च पशुभिः संकुलः प्रदेशः अस्ति। तत्र एकस्मिन् ग्रामे वीरभद्रः शीलभद्रः च परस्परं मित्र-भावम् उपगतौ अवसताम्। तौ प्रतिदिनं मृगयां क्रीडितुं, काष्ठानि च आहर्तुं वनात् वनम् अगच्छताम्। एकदा वनात् वनं भ्रमन्तौ तौ अतिदूरं निर्गतौ। तस्मिन् निर्जने प्रदेशे श्रमाकुलौ तौ एकस्य वृक्षस्य अधस्तात् विश्रान्तुम् उपविष्टौ।

अथ वीरभद्रः पिपासाकुलं शीलभद्रं तत्र परित्यज्य जलम् आनेतुम् इतस्ततः पर्यभ्रमत्। अत्रान्तरे एकः सिंहः कुतश्चित् उपागत्य सहसा एव शीलभद्रस्य उपरि तीक्ष्णैः नखैः प्रहारम् अकरोत् । तस्मिन् संभ्रमे शीलभद्रः निजं बन्दूकम् अपि चालयितुं समर्थः न अभवत्। स उच्चैः चीत्कारम् अकरोत्।

तस्य चीत्कारं श्रुत्वा वीरभद्रः वेगेन तत्र आगतः । निज-मित्रं सिंहेन आक्रान्तं दृष्ट्वा स साहसम् आधाय तीक्ष्णेन परशुना सिंहस्य शिरसि कटिभागे च अनेकान् प्रहारान् अकरोत्। तस्य प्रबलैः प्रहारैः, जर्जरितः शरीरः सः सिंहः तत्रैव पंचत्वं गतः।

ततः वीरभद्रः भूमौ शयानं निःसंज्ञं शीलभद्रं पृष्ठेन अवहत्, तं च विंशति-किलोमीटर-दूर-स्थितं चिकित्सालयम् अनयत्। किंचित्कालान्तरं शीलभद्रः संज्ञां लब्धवान्। एवं वीरभद्रः निजेन अदम्येन साहसेन बलेन च स्व- मित्रस्य प्राण-रक्षाम् अकरोत्। तस्मिन् क्षणे सः निजं कष्टं श्रमं चापि न मनाक् अपि अगणयत्। मृत्यु-भयम् अपि तस्य न आसीत्।

निजाय अद्भुताय साहस-कर्मणे पंचदश-वर्ष देशीयः अयं वीरभद्रः राष्ट्रिय-पुरस्कारेण विभूषितः, सम्मानितः च अभवत्।

## शब्दार्थः

गहनैः वनैः = घने जंगलों से
मृगया = शिकार
आहर्तुम् = (आ√ह, तुमुन्) लाने के लिए
परशुना = कुल्हाड़े से
पञ्चत्वं गतः = मर गया
निः संज्ञम् = बेहोश (शीलभद्र को)

चिकित्सालयः = अस्पताल
संज्ञा लब्धवान् = होश को प्राप्त हुआ
न अगणयत् = नहीं गिना
आक्रान्तं = पकड़ा हुआ
तस्मिन् संभ्रमे = उस घबराहट में
आधाय = (आ√धा, क्त्वा ,ल्यप्)
धारण करके

## अभ्यास

१. हिन्दी में उत्तर लिखो-

(क) वीरभद्र तथा शीलभद्र वन में किस लिए जाते थे?

(ख) जब शीलभद्र पर सिंह ने आक्रमण किया, तब वीरभद्र कहां था?

(ग) सिंह को मारने के बाद वीरभद्र ने क्या किया?

(घ) वीरभद्र को उसके साहस का क्या फल मिला?

२. निम्नलिखित वाक्यों में, कोष्ठकों में दिए गए शब्दों अथवा धातुओं की उपयुक्त रचना करके, रिक्त स्थानों की पूर्ति करो:-

(क) तत्र एकस्मिन् ग्रामे वीरभद्रः शीलभद्रः च............(√वस्)।

(ख) तौ एकस्य..............(वृक्ष) अधस्तात् उपविष्टौ।

(ग) तस्य चीत्कारं........................(श्रु) वीरभद्रः वेगेन तत्र आगतः।

(घ) ततः वीरभद्रः शीलभद्रं...................(पृष्ठ) अवहत्।

३. निम्नलिखित क्रियारूपों में यथानिर्दिष्ट वचन परिवर्तन करो:
अवसताम् (एक वचन में) अगच्छताम् (बहुवचन में)। अनयत् (उत्तम पुरुष में)। अभवत् ( मध्यम पुरुष में)। अवहत् (द्विवचन में)। अगणयत्। (बहुवचन में)

४. समस्त पदों का विग्रह करो तथा समास का नाम बताओ-
पिपासाकुलम्, जर्जरितशरीरः, मृत्युभयम्, श्रमाकुलौ।

५. संस्कृत में उत्तर लिखो:-

(क) मणिपुर-प्रदेशः कुत्र अस्ति?

(ख) वीरभद्रः शीलभद्रः च परस्परं कथम् अवसताम्?

(ग) वीरभद्रः केन पुरस्कारेण सम्मानितः?

◇◇◇◇

# दशमः पाठः

# चित्र-श्लोकाः

१. तातेन कथितं, पुत्र, लेखमेकं, लिखाधुना।
न तेन लिखितो लेखः, पितुराज्ञा न लंघिता॥

२. **कं संजघान श्रीकृष्णः? का शीतल-वाहिनी गंगा।**
**के दार-पोषण-रताः? कं बलवन्तं न बाधते शीतम्?॥**

३. सीमन्तिनीषु का शांता? राजाऽभूत् को गुणोत्तमः॥
विद्वद्भिः का सदा वंद्या? अत्रैवोक्तं न बुध्यते।

४. कस्तूरी जायते कस्मात्? को हन्ति करिणां कुलम्॥
युधि किं कुरुते भीरुः? मृगात् सिंहः पलायते॥

### शब्दार्थः

जघान, संजघान = मारा
दार-पोषण-रताः = पत्नी का भरण पोषण करने वाले
विद्वद्भिः = विद्वानों से
वंद्या = वन्दनीय
केदार-पोषणः रताः = खेत की देखभाल करने वाले
सीमन्तिनीषु = स्त्रियों में
भीरुः = डरपोक

### अभ्यास

१. सन्धिच्छेद करो—
लिखाधुना। लेखमेकं। राजाऽभूत्। तत्रैव। को हन्ति।

२. यथानिर्दिष्ट वचन परिवर्तन करो-
त्वं लेखं लिख (बहुवचन में)। का शान्ता (द्विवचन में)। केदार-पोषण-रताः (एकवचन में)।

३. संस्कृत में उत्तर लिखोः-
(क) कं संजघान कृष्णः?

(ख) कस्तूरी जायते कस्मात्?

(ग) युधि किं कुरुते भीरु:?

**चित्रश्लोकों के उत्तर**

१. तीसरे पाद में 'न' और 'तेन' इन दो शब्दों को एक (नतेन=झुके हुए ने) बना देने से चौथा पाद संगत हो जाता है ।

२. चारों पादों में चार प्रश्न हैं। प्रत्येक पाद के पहले दो शब्दों को इस प्रकार मिला देने से उस-उस पाद के प्रश्न का उत्तर मिल जाता है— कंसं जघान, काशी-तल-वाहिनी, केदार-पोषण-रता:, कंबलवन्तम्।

३. पहले तीन पादों में तीन प्रश्न हैं। प्रत्येक पाद के पहले और अन्तिम अक्षर को मिला कर उत्तर बन जाता है- सीता, राम, विद्या ।

४. पहले तीन पादों के तीन प्रश्नों के उत्तर चौथे पाद के क्रमश: एक-एक शब्द में हैं।

✧✧✧✧

# एकादशः पाठः

# चित्रकर्णः उष्ट्रः

कस्मिंश्चित् वन-प्रदेशे मदोत्कटः नामकः सिंहः आसीत्। तस्य काकः, व्याघ्रः शृगालः च इति त्रयः सेवकाः आसन्। अथ भ्रमन्तः ते कमपि उष्ट्रम् अपश्यन् — तं च अपृच्छन्-"कुतः त्वम् आगतः?' सः अकथयत्-अहं सार्थात् भ्रष्टः अत्र प्राप्तः अस्मि।" ततः ते तं सिंहस्य समीपम् अनयन्। सिंहः तस्मै अभय-वचनं दत्वा तस्य 'चित्रकर्ण' इति नाम अकरोत्, तं च सेवक-वर्गे अस्थापयत्।

अथ कदाचित् सिंहस्य शरीर- वैकल्यात् आहारम् अलभमानाः ते व्यग्राः अभवन्। ततः ते अचिन्तयन्- "चित्रकर्णम् एव यथा स्वामी भोजनार्थं हन्ति तथा कर्त्तव्यम्। किम् अनेन कण्टक-भक्षकेण?" व्याघ्रः अवदत्- "स्वामिना अभय-वचनं दत्वा असौ अनुगृहीतः । तत् कथम् एवं सम्भवति?" काकः अवदत् "अस्मिन् समये परिक्षीणः स्वामी पापम् अपि करिष्यति।" एवं विचिन्त्य ते सर्वे सिंहान्तिकम् अगच्छन्।

सिंहः अपृच्छत्—"आहारार्थं किंचित् प्राप्तम्?" ते प्रत्यवदन्-"यत्नात् अपि न प्राप्तं किंचित् आहारः।" सिंहः आह- "कः अधुना जीवनोपायः?" काकः अवदत्- "देव, स्वाधीनस्य आहारस्य परित्यागात् सर्वनाशः अयम् उपस्थितः।" सिंहः अपृच्छत्- "कः अत्र आहारः स्वाधीनः?" काकः कर्णे अकथयत्- "चित्रकर्णः" इति। सिंहः भूमिं स्पृष्ट्वा कर्णौ अस्पृशत् अवदत् च- "अभय-वचनं दत्वा धृतः अयम् अस्माभिः। तत् कथम् एवं सम्भवति। यतः हि सर्वेषु दानेषु अभय-दानं महादानम् अस्ति।" काकः अवदत्—"स्वामी तं न हन्यात्। वयम् एव तथा कुर्मः यथा असौ स्व-देहम् अर्पयति।" सिंहः तत् श्रुत्वा तूष्णीम् अभवत्।

ततः काकः लब्धावकाशः कूटं कृत्वा सर्वान् आदाय सिंहस्य समीपे अगच्छत्। अथ काकः अकथयत्— "देव, यत्नात् अपि आहारः न प्राप्तः । अनाहारेण व्याकुलः क्षीणः च स्वामी इदानीं मदीयं मांसं स्वीकरोतु।" सिंहः अवदत्— "भद्र, वरं प्राण-परित्यागः, न पुनः ईदृशो कर्मणि प्रवृत्तिः।" शृगालः अपि आह- "देव,

मम मांसम् अङ्गीकरोतु भवान्।'' ततः सिंहः आह- ''मा मा एवम्।'' अथ व्याघ्रः अब्रवीत्—''मम देहेन जीवतु स्वामी।'' सिंहः अवदत् —''न कदाचित् एवम् उचितम्।'' अथ चित्रकर्णः अपि जात-विश्वासः अवदत्- ''मम शरीरम् अङ्गीकरोतु स्वामी।'' ततः तस्य वचनात् तत्क्षणम् एव व्याघ्रः तं व्यापादयत्, सर्वे च मिलित्वा तम् अभक्षयन्।

## शब्दार्थः

सार्थात् भ्रष्टः = झुण्ड से बिछुड़ा हुआ

अस्थापयत् = (√स्था, णिच्, लङ् प्र. ए.) रख लिया

शरीर वैकल्यात् = शरीर की दुर्बलता के कारण

जात-विश्वासः = वह जिसे विश्वास हो गया है, विश्वस्त होकर

अभय वचनं दत्वा = प्राण दान देकर

हन्यात् = (√हन्, विधिलिङ् प्र. ए.) मारे

लब्धावकाशः = वह जिसे मौका मिल गया है, मौका पाकर

कूटम् = षड्यन्त्र, कपट-पूर्ण चाल

सम्भवति = (सम् √भू लट्, प्र. ए.) हो सकता है।

परिक्षाणः = कमज़ोर

## अभ्यास

१. हिन्दी में उत्तर लिखो :-

(क) सिंह के तीन सेवक कौन थे?

(ख) सिंह ने कान छूकर क्या कहा?

(ग) चित्रकर्ण को मरवाने का षड्यन्त्र किसने रचा?

(घ) इस कथा से हमें क्या शिक्षा मिलती है?

२. सामने दिए गए शब्दों में से उचित शब्द चुनकर रिक्त स्थान भरो:-

(क) किम्.......................कण्टक -भक्षकेण? (अनया, अनेन, एतया)

(ख) ........................ दानेषु अभय-दानं महादानम्।

(सर्वासु, सर्वेषु, सर्वेषाम्)

(ग) यत्नात् अपि न प्राप्तं किंचित्........................(आहारः, भोजनम्)

३. निम्नलिखित शब्दों में से उपसर्ग अलग करो:-

परिक्षीणः। प्रत्यवदत्। परित्यागः।

४. निम्नलिखित शब्दों में से धातु और प्रत्यय पृथक् करो:-

(जैसे— कृत्वा = √कृ, क्त्वा > त्वा)

श्रुत्वा। दत्त्वा। स्पृष्ट्वा।

५. संस्कृत में उत्तर लिखो:-

(क) वनप्रदेशे: क: प्रतिवसति स्म?

(ख) सर्वेषु दानेषु महादानं किम् अस्ति?

(ग) उष्ट्रस्य किं नाम आसीत्?

✧✧✧✧

## द्वादशः पाठः

# रुप्यकस्य आत्मकथा

महापुरुषाः एव आत्म-कथां कथयन्ति लिखन्ति वा। अहं तु न महापुरुषः, तथापि महापुरुषाणां सुचरितम् अवश्यम् अनुसरणीयम् इति विचार्य अहम् अद्य आत्मचरितं संक्षेपेण कथयामि। युष्माकं स्नेह-पूर्णः आग्रहः अपि माम् अस्मिन् कर्मणि नियोजयति। महापुरुषाणां जीवन-कथा प्रेरणा-प्रदा भवति। मम जीवन-कथा तु तादृशी न अस्ति। तथापि इयम् अनेकैः मधुरैः कटुभिः च अनुभवैः पूर्णा अस्ति। अतः इयं मम कथा युष्मभ्यं रोचिष्यते इति मम दृढः विश्वासः अस्ति।

मम जन्म कलकत्ता नगरे टंक-शालायाम् अभवत्। यदा मम जन्म अभवत्, तदा अपूर्वा मम कान्तिः आसीत् इति वृद्धाः कथयन्ति। मम शरीरं गोलाकारम् अस्ति इति यूयं पश्यथ, परन्तु किं जानीथ यूयं मम अस्य देहस्य पार्श्वभागयोः किं लिखितम् इति ? मम देहस्य एकस्मिन् पार्श्वे चतुः सिंह-मूर्तिः अङ्किता अस्ति। मूर्तिः इयं मौर्य- कालिकस्य स्तम्भस्य उपरि प्रतिष्ठितायाः चतुःसिंह-मूर्तेः प्रतिरूप-भूता वर्तते। मम देहस्य अस्मिन् पार्श्वे भारतम् इति अपि लिखितम् अस्ति। अन्यस्मिन् पार्श्वे मम जन्म-कालः लिखितः अस्ति।

मम जीवन-कथा प्रभूतानां यात्राणां कथा अस्ति। अहं निज जीवने बहूनां प्रदेशाणां नगराणां ग्रामाणां च यात्राम् अकरवम्। मम प्रथमा यात्रा स्व-नगरे एक बैंक-भवनं प्रति आसीत्। तत्र अहं कतिपयैः बन्धुभिः सह प्राविशम्। तस्मिन् बैंक-भवने अहं न चिरम् अवसम्। कश्चित् राजसेवकः मां तस्मात् स्थानात् स्वकीयं गृहम् अनयत्। अन्यस्मिन् दिने सः मां कस्यचित् पण्य-पदार्थस्य मूल्य रूपेण कस्मैचित् आपणिकाय अयच्छत्। सः आपणिकः कृपणः आसीत्। सः मां स्व-गृहे एकान्त-प्रदेशे मञ्जूषायां न्यक्षिपत्। प्रतिदिनं प्रातः तां मञ्जूषाम् उद्घाट्य स मां सस्पृहम् अपश्यत्, पुनः च सः मां तस्याम् एवं मञ्जूषायां न्यक्षिपत्। एवम् अहं तत्र कतिपयैः बन्धुभिः सहितः बहूनि दिनानि अवसम्। तत्र निवसतः मम अनेके बान्धवः न जाने कुत्र गताः, अनेके च अपरिचिताः नवाः बान्धवः समागताः। एकदा सः आपणिकः माम् आदाय कस्यचित् मिष्टान्नकारस्य आपणम् अगच्छत्। तत्र स

मधुराणि मोदकानि अखादत्। तेषां मूल्य रूपेण सः मां तस्मै मिष्टान्नकाराय अयच्छत्।

निशारम्भे सः मिष्टान्नकारः मां चर्म-पुटे निक्षिप्य आपणात् स्व- भवनम् अनयत् । तत्र अहं कतिचित् दिनानि सुखेन अवसम्। ततः सः एकस्मिन् दिने नगरान्तरं गतः। तत्र माम् आम्र-फलानां मूल्य-रूपेण कस्मैचित् फलापणिकाय अयच्छत्। सः माम् अन्यान् च मम बन्धून् बैंक-भवनम् अनयत्, तत्र च सर्वान् अस्मान् तत्कोषाध्यक्षाय समर्पितवान्। अन्यस्मिन् दिने कश्चित् व्यापारी मां बैंकभवनात् आदाय दिल्ली नगरम् अगच्छत्। तत्र सः कुत्रचित् रत्नापणे भूषणानि अक्रीणात्, मां च मम अन्यैः बहुभिः बन्धुभिः सह रत्नापणिकाय अयच्छत्। तस्मात् रत्नापणिकात् अहं कस्यचित् सुवर्णकारस्य हस्तम् अगच्छम्। सः सुवर्णकारः मां कस्मैचित् ताम्बूलिकाय प्रदत्तवान्। तस्य गृहात् कश्चित् चौरः माम् अहरत्। तस्य हस्तात् अहं कस्यचित् कितवस्य हस्तं ततः च कस्यचित् राज-पुरुषस्य हस्तं, ततः च पुनः कस्यचित् आपणिकस्य हस्तं अगच्छम्।

एवं विविधानां लोकानां हस्तात् हस्तं गच्छन्, नगरात्, नगरान्तरं ग्रामात् च ग्रामान्तरं भ्राम्यन् अहं कदाचित् राज-गृहे, कदाचित्, बैंक-भवने, कदाचित् रत्नापणे, कदाचित् धनिक-गेहे, कदाचित्, दरिद्र-कुटीरे, कदाचित् देवालये कदाचित् च चौर-गृहे निजम् आवासम् अकरवम्। सुदूरं चिरकालं च यावत् भ्रान्त्वा अद्य अहम् अतिमात्रां श्रान्तिम् अनुभवामि, विश्रान्तिं च कर्तुम् इच्छामि।

## शब्दार्थः

नियोजयति = (नि युज्, प्रेरणार्थक णिच्, लट्, प्र. ए.) नियुक्त करता है, लगाता है।

टंक-शालायाम् = टकसाल में

न्यक्षिपत् = (नि√क्षिप्, लङ्, प्र. ए.) रख दिया

कितवः = जुआरी

कोषाध्यक्षः = खजानची

श्रान्तिः = थकावट

प्रभूतानाम् = अनेकों (यात्राओं)

आपणिकः = दुकानदार

मञ्जूषायाम् = सन्दूकची में

सस्पृहम्=(क्रि. वि.) लालच भाव से

ताम्बूलिकः = तंबोली, पान बेचने वाला

मिष्टान्नकारः = हलवाई

चर्म-पुटे = चमड़े की थैली में (Leather-bag)

विश्रान्तिः = विश्राम

## अभ्यास

१. हिन्दी में उत्तर लिखो

(क) रुपये के दोनों ओर क्या अंकित है?

(ख) दुकानदार ने रुपये को कहाँ रखा?

(ग) रुपये की प्रथम यात्रा कहाँ से शुरु हुई?

२. निम्नलिखित रिक्त स्थानों की पूर्ति करो—

(क) महापुरुषाणां.........................अवश्यम् अनुसरणीयम्।

(ख) मम शरीरं गोलाकारम् अस्ति इति यूयं ..................।

(ग) तत्र सः.......................मोदकानि अखादत्।

(घ) तस्य गृहात् कश्चित्..........................माम् अहरत्।

(ङ) अद्य अहं विश्रान्तिं........................इच्छामि।

३. रेखांकित शब्दों में यथानिर्दिष्ट लकार-परिवर्तन करो-

(क) अहम् आत्म-चरितं <u>कथयामि</u>। (लोट् लकार में)

(ख) स मां मन्जूषायां <u>न्यक्षिपत्</u>। (लट् में)

४. निम्नलिखित वाक्यों को शुद्ध करो—

(क) सः तत्र बन्धूनां सह प्राविशत्।

(ख) स मां कमपि आपणिकम् अयच्छत्।

(ग) तत्र सः मधुरान् मोदकानि अखादत्।

५. संस्कृत में उत्तर लिखो-

(क) रुपयकस्य जन्म कुत्र अभवत्?

(ख) रुप्यकस्य शरीरं कीदृशम् अस्ति?

(ग) अद्य रुप्यकम् किं इच्छति?

✧✧✧✧

त्रयोदश: पाठ:

# सुभाषितानि

अस्ति यद्यपि सर्वत्र नीरं नीरज-राजितम्।
रमते न मरालस्य मानसं मानसं विना॥

न त्वहं कामये राज्यं, न स्वर्गं नापुनर्भवम्।
कामये दुःख तप्तानां प्राणिनाम् आर्ति-नाशनम्॥२॥

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःख-भाग् भवेत्॥३॥

अपूर्वः कोऽपि कोशोऽयं विद्यते, तव भारति।
व्ययतो वृद्धिमायाति, क्षयमायाति संचयात्॥ ४॥

दिवा पश्यति नोलूकः, काको नक्तं न पश्यति।
विद्या-विहीनो मूढस्तु, दिवा नक्तं न पश्यति॥ ५॥

परस्परं विवादे हि वयं पञ्च, शतं च ते।
अन्यैः सह विवादे तु, वयं पञ्चोत्तरं शतम्॥ ६॥

सुखार्थी चेत् त्यजेत् विद्यां, विद्यार्थी च त्यजेत् सुखम्।
सुखार्थिनः कुतो विद्या? कुतो विद्यार्थिनः सुखम्? ७॥

जल-बिन्दु-निपातेन क्रमशः पूर्यते घटः।
सः हेतुः सर्व-विद्यानां, धर्मस्य धनस्य च॥ ८॥

श्वः कार्यमद्य कुर्वीत, पूर्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः, कृतमस्य न वा कृतम्॥ ९॥

सत्काव्य-भूषणा वाणी, रजनी चन्द्र-भूषणा।
सुशील- भूषणा नारी, लक्ष्मीः विनय-भूषणा॥ १०॥

पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः।
धाराधरो वर्षति नात्म-हेतोः,
परोपकराय सतां विभूतयः॥ ११॥

श्रोत्रं श्रुतेनैव, न कुण्डलेन,
दानेन पाणिः, न तु कंकणेन।
विभाति कायः खलु सज्जनानां
परोपकारैः न तु चन्दनेन॥ १२॥

## शब्दार्थः

लघुचेतसाम् = छोटे दिल वालों का
वसुधा = पृथ्वी
विषकुम्भम् = ज़हर के घड़े को
उलूकः = उल्लू
मरालस्य = हंस का
अपुनर्भवम् = मोक्ष को
आर्ति = पीड़ा
निरामयाः = (निर्+आमय) नीरोग
प्रत्यक्षे = सामने (आँखों के सामने)
पाणिः = हाथ
परोक्षे = आँखों से परे (प्रत्यक्ष का उल्टा)
कुटुम्बकम् = परिवार
नीरज-राजितम् = कमल फूलों से शोभित
क्रमशः = क्रम से, धीरे-धीरे
पूर्वाह्णे = दिन के पूर्व भाग में
अम्भः = पानी
धाराधरः = बादल
श्रोत्रम् = कान
श्रुतेन = शास्त्र-ज्ञान से

## अभ्यास

१. इस पाठ में से तीन श्लोक कण्ठस्थ करो

२. निम्नलिखित में सन्धिच्छेद करो-

पञ्चोत्तरम्। यद्यपि। परोपकारः। वसुधैव।

३. निम्नलिखित वाक्यों में कोष्ठकों में लिखे शब्दों में से शब्द चुनकर रिक्त स्थानों की पूर्ति करो

(क) सर्वे भद्राणि ............। (गच्छन्तु, भवन्तु, पश्यन्तु)

(ख) सुखार्थिनः कुतो ......................। (विद्या, दुःखम्, सुखम्)

(ग) कामये .................. आर्ति-नाशनम्।

(प्राणिनाम्, ज्ञानिनाम्, विद्यार्थिनाम्)

(घ) श्रोत्रं .............. एव न कुण्डलेन।

(कंकणेन, श्रुतेन, चन्दनेन)

४. संस्कृत में उत्तर लिखो :—

(क) दिवा कः न पश्यति?

(ख) कायः केन विभाति?

(ग) विद्यार्थी किं त्यजेत्?

✧✧✧✧

# चतुर्दशः पाठः

# श्री गुरु नानक देवः

श्री गुरु-नानकदेवः महान् धार्मिक-नेता, समाज-सुधारकः च आसीत्। स सिक्ख धर्मस्य प्रवर्तकः आसीत्। सिक्खानां दशसु गुरुषु स आद्यः गुरुः वर्तते। स पश्चिमपंजाब-प्रदेशे तलवण्डी ग्रामे 1469-तमे ईसाब्दे मेहता-कालूरामस्य गृहे अजायत्। तस्य माता तृप्तादेवी आसीत्। श्रीनानकः बाल्यात् एव सत्यपरायणः प्रभुभक्तः परोपकार-निरतः प्रतिभावान् च आसीत्। विद्यार्जनाय गुरु-सकाशं प्रेषितः सः पट्टी नाम्नीं वाणीम् उच्चार्य वर्ण-मालायाः आध्यात्मिकीं व्याख्याम् अकरोत्। तत्कृताम् अपूर्वां व्याख्यां श्रुत्वा तस्य अध्यापकः अपि आश्चर्य-चकितः अभवत्।

बाल्ये श्री नानकः पित्रा व्यापार- कर्मणि, ततः च पशुचारण-कर्मणि नियुक्तः, परं तस्य मनः तत्र न अरमत्, तस्य हि मनः प्रभु-भक्ति-लीनम् अवर्तत्। यदा सः नवदशवर्ष-देशीयः अभवत् तदा तस्य विवाहः श्रीमूलराजस्य सुपुत्र्या सुलक्षणादेव्या सह संजातः। तस्य श्रीचन्द्रः, लक्ष्मीचन्द्रः च इति द्वौ पुत्रौ जातौ। तत्त्वज्ञान-प्राप्तये विविधानि स्थानानि भ्रान्त्वा अन्ते स कृषक- वृत्तिम् उपजीवन् गृहस्थ-धर्मम् अपालयत्। गृहस्थः अपि श्रीनानकः जले कमलपत्रम् इव निर्लिप्तं जीवनम् अनयत्।

श्री नानकः मानवधर्मस्य उपासकः आसीत्। विविधेषु वर्ण-जात्यादि भेदेषु तस्य विश्वासः न आसीत्। एकेन एव विश्वसृजा ईश्वरेण सृष्टाः सर्वे अपि मानवाः समानाः सन्ति इति तस्य दृढ आस्था आसीत्। मानव-प्रेम तस्य धार्मिक-विश्वासस्य मूलाधारः आसीत्। मानवेषु परस्परं भ्रातृ भावं वर्धयितुं स 'लंगर' इति नाम्ना प्रसिद्धस्य सामूहिक-भोजनस्य अपूर्वां परम्परां प्रवर्तितवान्।

श्रीनानकदेवः न केवलं भारतवर्षस्य, प्रत्युत् देशान्तराणाम् अपि सुदीर्घां यात्राम् अकरोत् । सः सर्वत्र मानव-प्रेम्णः, सर्व-धर्म-समतायाः च प्रचारम् अकरोत्। मक्का-तीर्थे सः ईश्वरस्य सर्व-व्यापकतां प्रदर्श्य तत्रत्यान् लोकान् एकेश्वर-भक्तिम् उपादिशत्।

श्रीलहना-नामकं स्व-प्रिय-शिष्यं श्रीअंगद-नाम्ना गुरु-पदे स्थापयित्वा श्री

गुरुनानकः 1539 तमे ईसाब्दे ज्योतिर्मयताम् अगच्छत्। श्री गुरु ग्रन्थे संकलिताः तस्य उपदेशाः मानव-प्रेम्णः, परोपकारस्य, परिश्रम-प्रवृत्तेः, सदाचारस्य, एकेश्वर भक्तेः, प्रभुनाम-जापस्य, गुरु-श्रद्धायाः च महत्वं प्रख्यापयन्ति।

## शब्दार्थः

अजायत् = (√जन् लङ् प्र. एक.) उत्पन्न हुआ
विद्यार्जनाय = विद्या प्राप्त करने के लिए
निर्लिप्तम् = आसक्ति-रहित(जीवन)
न अरमत् = (√रम्, लङ् प्र. ए.) नहीं लगा।
उपादिशत् = उपदेश दिया
अनयत् = (√नी, लङ् , प्र. ए.) बिताया
विश्वसृजा = सृष्टिकर्ता (प्रभु) द्वारा
सृष्टा = (√सृज्, क्त) बनाए गए
आस्था = विश्वास, यकीन
प्रवर्तितवान् = चलाया, प्रारम्भ किया
सुदीर्घाम् = बहुत लम्बी (यात्रा) को
ज्योतिर्मयताम् = ज्योतिर्मय स्वरूप को, प्रभु में लीन हो जाने की स्थिति (मृत्यु) को
प्रख्यापयन्ति = बताते हैं, उजागर करते हैं

## अभ्यास

१. हिन्दी में उत्तर लिखो

(क) श्री गुरु नानकदेव जी का जन्म कहाँ हुआ?

(ख) गुरु नानकदेव जी के मुख्य उपदेश क्या थे?

(ग) मनुष्यों में परस्पर भ्रातृभाव बढ़ाने के लिए गुरु नानकदेव जी ने कौन सी अनोखी प्रथा चलाई।

२. निम्नलिखित कोष्ठकों में दिए गए शब्दों में उचित विभक्ति-वचन लगाकर रिक्त स्थान की पूर्ति करो—

(क) श्रीनानकः ......................(बाल्य) एव सत्य-परायणः आसीत्।

(ख) सः मानव-प्रेम्णः................ (प्रचार) अकरोत्।

(ग) सः लोकान्.........................(एकेश्वर-भक्ति) उपादिशत्।

३. अव्ययों को संस्कृत वाक्यों में प्रयोग करो-

अपि, यदा, इव, च, तदा।

४. सन्धिच्छेद करो-

विद्यार्जन। परोपकार। मूलाधार। एकेश्वर। उपादिशत्। सदाचार।

५. संस्कृत में उत्तर लिखो-

(क) गुरु नानकस्य जन्म कदा अभवत् ?

(ख) श्री गुरु नानकस्य मातुः नाम किम् आसीत्?

(ग) श्री नानकः कस्य धर्मस्य उपासकः आसीत्?

✧✧✧✧

# पंचदशः पाठः

# भीष्म-प्रतिज्ञा

पुरा हस्तिनापुरे शांतनुः नाम नृपतिः अभवत्। गंगा शान्तनोः भार्या आसीत्। गंगायाः देवव्रतः नाम सुतोऽभवत्। सः शूर : उदारश्चासीत्। सर्वत्र तस्य शौर्यस्य ख्यातिः प्रासरत्।

एकदा शांतनुः यमुनायाः तीरम् अगच्छत्। तत्र सः कस्यचित् धीवरस्य रूपवतीं कन्यां सत्यवतीम् अपश्यत्। तस्याः लावण्येन नृपतिः मोहितोऽभवत्। तस्याः पितरम् उपगम्य नृपतिः अकथयत्। भो धीवरः! स्वकीयं रूपवतीं दुहितरं मह्यं विवाहे यच्छ''। धीवरः प्रत्यवदत्-''भो नृपते! अहं सत्यवतीं तुभ्यं दास्यामि, यदि त्वं स्वं राज्यं तस्याः सन्ततये दास्यसि।'' शांतनुः अकथयत्-''तदहं न वदिष्यामि। यतः राज्ये देवव्रतस्य अधिकारोऽस्ति।'' नृपतिः नैराश्येन गृहम् अगच्छत्।

यदा देवव्रतः वृत्तान्तम् अवागच्छत्, तदा सः धीवरम् उपगम्य अकथयत्-भो धीवर! यमुनायाः अग्रे ममैषा प्रतिज्ञा अस्ति-''अहं कदापि राज्यं ग्रहणं न करिष्यामि। अपि च, अहम् आजीवनं ब्रह्मचर्येण स्थास्यामि। येन तव दुहितुः **संततेः एव राज्ये** अधिकारः स्यात्।'' देवव्रतस्य प्रतिज्ञां श्रुत्वा धीवरः सत्यवतीं नृपतये अयच्छत्।

ततः प्रभृति देवदत्तस्य अभिधानं 'भीष्मः' इति अभवत्। तदा शांतनुः भीष्माय एतं वरमयच्छत्-''मृत्युः सदा तव वशे स्यात्।'' भीष्म प्रतिज्ञाम् अपालयत् स्वेच्छया च प्राणान् अत्यजत्।

## शब्दार्थः

भार्या = पत्नी
ख्याति = यश
संततिः = सन्तान
रूपवती = सुन्दर
दुहितृः = पुत्री
अधिकार = हक
लावण्यम् = सुन्दरता

आजीवनम् = जीवन भर
वृत्तान्तम् = घटना को
अभिधानम् = नाम
नैराश्यम् = निराशा
शौर्यम् = बहादुरी
प्रभृति = लेकर
स्वेच्छया = अपनी इच्छा से

## अभ्यास

१. हिन्दी में उत्तर लिखो-

(क) देवव्रत किसका पुत्र था ?

(ख) धीवर ने राजा से सत्यवती के साथ विवाह के लिए क्या शर्त रखी ?

(ग) देवव्रत ने क्या प्रतिज्ञा की ?

२. सन्धि विच्छेद करो-

मोहितोऽभवत्, ममैषा, प्रत्यवदत्, वरमयच्छत्।

३. रिक्त स्थानों की पूर्ति करो—

(क) गंगा------भार्या आसीत्।

(ख) गंगायाः------नाम सुतोऽभवत्।

(ग) धीवरः---------नृपतये अयच्छत्।

(घ) देवव्रतस्य अभिधानं--------इति अभवत्।

४. संस्कृत में उत्तर लिखो

(क) पुरा हस्तिनापुरे कः नृपतिः अभवत् ?

(ख) शांतनुः यमुनायाः तीरे किं अपश्यत् ?

(ग) शांतनुः भीष्माय किं वरं अयच्छत् ?

# षोडश: पाठ:

# हितोपदेश:

१. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥

२. विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनम् आप्नोति धनाद् धर्म: तत: सुखम्॥

३. स जातो येन जातेन याति वंश: समुन्नतिम्।
परिवर्तिनि संसारे मृत: को वा न जायते॥

४. वरमेको गुणी पुत्रो न च मूर्खशतानि अपि।
एक: चन्द्र: तमो हन्ति न च तारागणा अपि॥

५. कीटोऽपि सुमन: संगाद् आरोहति सतां शिर:।
अश्मापि याति देवत्वं महद्भि: सुप्रतिष्ठित:॥

६. आपत्काले तु सम्प्राप्ते, यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु सम्प्राप्ते दुर्जनोऽपि **सुहृद् भवेत्**॥

७. मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु य: पश्यति स: पण्डित:॥

८. षड् दोषा: पुरुषेणेह हातव्या भूतिम् इच्छता।
निद्रा तन्द्रा भयं क्रोधं आलस्यं दीर्घसूत्रता॥

९. अल्पानामपि वस्तूनां संहति: कार्यसाधिका।
तृणै: गुणत्वं आपन्नै: बध्यन्ते मत्तदन्तिन:॥

१०. दानं भोगो नाश: तिस्र: गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥

## शब्दार्थः

धीमताम् = विद्वानों का
पात्रताम् = योग्यता
परिवर्तिनि = परिवर्तनशील
कीटः = कीड़ा
आरोहति = चढ़ता है
अश्मा = पत्थर
लोष्ठवत् = मिट्टी के समान
हातव्या = छोड़ देना चाहिए
तन्द्रा = आलस्य, थकान
संहतिः = एकता
वित्तस्य = धन की
कलहेन = झगड़े से
आप्नोति = प्राप्त करता है
तमः = अन्धकार को
सुमनः = फूल
सताम् = सज्जनों के
परदारेषु = परायी स्त्रियों में
पण्डितः = विद्वान्
भूतिम् = ऐश्वर्य
दीर्घसूत्रता = देर से काम करना
आपन्नैः = युक्त
भुङ्क्ते = भोगता है ।

## अभ्यास

१. हिन्दी में उत्तर लिखो-

(क) विद्वानों का समय कैसे बीतता है?

(ख) सच्चा मित्र कौन होता है?

(ग) मनुष्यों को कौन से दोष छोड़ देने चाहिए?

(घ) धन की कितनी गतियाँ होती हैं।

२. सन्धि करो :

कालः + गच्छति, कीटः + अपि, गतयः + भवन्ति

यः + न, तमः+ हन्ति

३. रिक्त स्थानों की पूर्ति करों-

(क) एकः चन्द्रः ........................ हन्ति

(ख) विद्या ददाति ........................

(ग) विनयाद् याति ........................

(घ) ................ गतयो भवन्ति वित्तस्य।

✧✧✧✧

## सप्तदशः पाठः

# सूर्य-परिवारः

प्रातः सूर्यः पूर्वे दिग्विभागे उदेति, सायं च पश्चिमे अस्तमेति, इति प्रति-दिनं पश्यामः। तत् किं सूर्यः पूर्वात् पश्चिमं प्रति गच्छति ? न हि, तत् तथा न। सूर्यः स्वस्थाने स्थितः निजे अक्ष-बिन्दौ भ्रमति, अस्माकं पृथिवी तं परितः परिभ्रमति। यदा वयं रेल-याने उपविष्टाः गच्छामः, तदा चलम् अपि यानं निश्चलं प्रतिभाति, बहिःस्थाः च निश्चलाः अपि वृक्षाः चलाः प्रतिभान्ति । परन्तु वस्तुतः यानम् एव धावति न वृक्षाः। तथा एव अस्माकं पृथिवी एव परिभ्रमति न तु सूर्यः।

पृथिवी इव अन्ये विशालाः पिण्डाः आकाशे सूर्यं परितः परिभ्रमन्ति। तान् 'ग्रहाः' इति कथयन्ति। ते च क्रमेण बुद्धः, शुक्रः, पृथिवी, मंगल, बृहस्पतिः, शनिः, अरुणः, वरुणः, कुबेरः इति नव सन्ति। तत्र अपरे अपि अल्पाः पिण्डाः सन्ति, ये एतान् ग्रहान् परितः परिभ्रमन्ति। अतः तान् 'उपग्रहान्' वदन्ति। यथा अस्माकं पृथिव्याः, एकः एव उपग्रहः तथा मंगलस्य द्वौ उपग्रहौ, बृहस्पतेः नव, शनेः अपि नव, अरुणस्य चत्वारः, वरुणस्य च एकः उपग्रहः। परिवारस्य सदस्याः इव एते नव ग्रहाः षड्विंशतिःच उपग्रहाः सूर्यं परितः अण्डकारे वृत्ते परिभ्रमन्ति, अतः एतं सूर्य-परिवारं सौर-मण्डलम् अपि कथयन्ति।

सूर्यस्य एका एव गतिः। अयं चक्रस्य नाभिः इव निजे अक्षे एव भ्रमति। अस्माकं पृथिव्याः, अन्येषां च ग्रहाणां द्विविधा गतिः। एते ग्रहाः यथा स्वे-स्वे अक्षे-चक्र- नाभिवत् भ्रमन्ति, तथा चक्र- नेमिवत् निज-निज काक्षायां सूर्यं परितः अपि परिभ्रमन्ति। उपग्रहाणां तु त्रिविधा गतिः। ते यथा निजे अक्षे भ्रमन्ति, तथा स्वं-स्वं ग्रहं परितः अपि परिभ्रमन्ति। एवं च निज ग्रहेण सहिताः ते सूर्यं परितः अपि परिभ्रमन्ति।

सूर्यः उज्ज्वलः अग्नि-पिण्डः सर्वेभ्यः प्रकाशं, तापम्, ऊर्जां च यच्छति। पृथिव्याः यः भागः यदा सूर्यम् अभितः भवति, तदा तत्र सूर्यस्य प्रकाशः पतति, तेन हि दिनं भवति। अपरस्मिन् च पृष्ठे भागे अन्धकारेण रात्रिः भवति। पृथिव्याः स्वे अक्षे भ्रमणेन पृथिव्याः सर्वे भागाः पर्यायेण सूर्यम् अभितः आगच्छन्ति। इत्थं

सर्वत्र पर्यायेण दिनं रात्रि: वा, प्रात: सायं वा इति काल-विभागा: भवन्ति। अस्या: स्वे अक्षे एकस्य भ्रमणस्य काल: चतुर्विंशति: होरा: । तं दिन-रात्रि विभक्तं चतुर्विंशति-होरा-मितं-कालं दिवसम् अपि वदन्ति। सूर्यम् अभित: पृथिव्या: स्वे अक्षे: भ्रमणेन एव पूर्व-पश्चिमयो:, उत्तर-दक्षिणयो: च दिग्विभागानाम् अपि बोध: भवति। प्रात: सूर्योदय-काले सूर्याभिमुखं स्थितानाम् अस्माकं यस्मिन् दिग्विभागे मुखं सा पूर्वा दिशा, यत्र अस्माकं पृष्ठं सा पश्चिमा दिशा, अस्माकं वामेन हस्तेन उत्तर-दिशा, दक्षिणेन च हस्तेन दक्षिणा दिशा।

पूर्वम् कथितं यत् पृथिवी सूर्यं परित: अपि परिभ्रमति अण्डाकारे वृत्ते। अनेन सूर्यात् पृथिव्या: दूर-समीप – भावात् शीतग्रीष्मादीन् ऋतून् अनुभवाम:। अनेन एव दिनानां रात्रीणां च पर्यायेण लघुता दीर्घता वा भवति। सूर्यं परित: पृथिव्या: परिभ्रमणे त्रीणि शतानि पंचषष्टि: च दिवसा: गच्छन्ति, तं कालं 'वर्षं' कथयन्ति।

## शब्दार्थः

परित: = चारों ओर
भ्रमति = घूमता है
परिभ्रमति = चक्कर लगाता है
प्रतिभाति = जान पड़ता है
पिण्ड: = गोला
वृत्त = घेरा, चक्कर
नाभि: = नाभ, मध्यभाग
अक्ष = बीच की कीली (axle)
उज्ज्वल: = चमकदार
अग्नि-पिण्ड: = आग का गोला
अभित:= की ओर
पर्यायेण= बारी से
होरा = घंटा
लघुता = छोटा होना, छोटापन
दीर्घता = लम्बा होना, लम्बाई
नेमि = पहिये का घेरा

## अभ्यास

१. हिन्दी में उत्तर लिखो—

(क) क्या सूर्य पृथ्वी के गिर्द घूमता है या पृथ्वी सूर्य के गिर्द?

(ख) क्या रेल गाड़ी में जाते हुए हमें बाहर के वृक्ष दौड़ते हुए प्रतीत होते हैं? क्या वस्तुत: वृक्ष दौड़ते हैं?

(ग) भ्रमण (घूमना) और परिभ्रमण (चक्कर लगाना) में क्या अन्तर है? दृष्टान्त से स्पष्ट करो।

(घ) हम दिशाओं का निर्धारण कैसे करते हैं?

(ङ) क्रमशः सूर्य, ग्रहों और उपग्रहों की कितने प्रकार की गतियाँ होती हैं।

२. रिक्त स्थानों की पूर्ति करो—

(क) प्रातः ..................... पूर्वे दिग्विभागे उदेति।

(ख) वस्तुतः यानम् एव धावति न .....................

(ग) ..................... तु त्रिविधा गतिः।

(घ) अस्माकं यस्मिन् दिग्विभागे मुखं सा ..................... दिशा।

३. रेखांकित शब्दों में विभक्तियों को शुद्ध करो-

(क) विशालाः, पिण्डाः सूर्यस्य परितः परिभ्रमन्ति।

(ख) सूर्यः सर्वान् प्रकाशं यच्छति।

(ग) यः भागः सूर्यस्य अभितः भवति, तत्र प्रकाशः पतति।

४. इन क्रिया-पदों में से उपसर्गों को पृथक् करो-

अनुभवामः। परिभ्रमति। आगच्छति। उदेति।

५. संस्कृत में उत्तर लिखो-

(क) सूर्य कस्मिन् दिग्विभागे उदेति?

(ख) आकाशे कति ग्रहाः सन्ति?

(ग) सूर्य-परिवारं किं कथयन्ति?

(घ) पृथ्वी कं परितः परिभ्रमति?

✧✧✧✧

## अष्टादश: पाठ:

# तुलां लोहेन घटितां यत्र खादन्ति मूषिका:

कस्मिंश्चित् नगरे जीर्णधन: नाम वणिक् आसीत्। स एकदा भृशं धनम् अर्जितुं देशान्तरं गन्तुम् ऐच्छत्। तस्य गृहे लोहेन घटिता पूर्व - पुरुषोपार्जिता एका तुला आसीत्। स: तां तुलां कस्यचित् श्रेष्ठिन: गृहे निक्षेपभूतां कृत्वा अगच्छत्। तत: सुचिरं कालं देशान्तरेषु यथाकामं भ्रान्त्वा पुन: स्व- नगरम् आगत्य स तं श्रेष्ठिनम् अवदत्- ''भो: श्रेष्ठिन् दीयतां सा मे तुला।'' श्रेष्ठी प्रत्यवदत्— ''भद्र, न अस्ति ते तुला, सा तु मूषिकै: भक्षिता।'' जीर्णधन: आह—''भो: श्रेष्ठिन् न अस्ति तव दोष: यदि सा मूषिकै: भक्षिता। ईदृश: एव अयं संसार:। न किंचित् अत्र शाश्वतम् अस्ति। अहं तावत् स्नानार्थं नदीं गच्छामि। तत् त्वम् आत्मीयं दारकम् एनं मया सह स्नानोपकरणेन सहितं प्रेषय।'' स: अपि श्रेष्ठी स्व- पुत्रम् अवदत् ''वत्स, तव पितृव्य: अयं स्नातुं नदीं याति। तत् गच्छ अनेन सार्धं स्नानोपकरणम् आदाय।''

अथ असौ श्रेष्ठि- सुत: स्नानोपकरणम् आदाय प्रसन्नमना: तेन अभ्यागतेन सह अगच्छत्। स: वणिक् जीर्णधन: नद्यां स्नात्वा तं शिशुं नदी समीपे कस्मिंश्चित् निर्जने गृहे प्रवेश्य द्वारं च पिधाय आगच्छत्।

अथ स श्रेष्ठी तम् अपृच्छत्— ''भो: अभ्यागत, कथय कुत्र स मम दारक:, य: त्वया सह नदीं गत: ?'' जीर्णधन: अवदत्- ''नदी-तटात् स श्येनेन अपहृत:।'' श्रेष्ठी अकथयत्- ''भो: मिथ्यावादिन् किं क्वचित् श्येन: बालं हर्तुं शक्नोति ? तत् समर्पय मम सुतम्। अन्यथा राजपुरुषाय निवेदयिष्यामि।'' जीर्णधन: आह- ''भो: सत्यवादिन्, यथा श्येन: बालं न अपहरति तथा मूषिका अपि लोह-घटितां तुलां न भक्षयन्ति। तत् अर्पय मे तुलां, यदि तव दारकेण प्रयोजनम्।''

एवं विवदमानौ तौ उभौ कोट- पालिकाम् अगच्छताम्। श्रेष्ठी आह- ''श्रीमन्त:, मम शिशु: अनेन चौरेण अपहृत:।'' अथ - राजपुरुषा: तम् अवदन् ''भो: अस्य दारकं प्रत्यर्पय।'' स आह- ''किं करोमि ? पश्यत: मे नदी-तटात् श्येनेन अपहृत: शिशु:।'' तत् श्रुत्वा ते राजपुरुषा: अवदन्- ''भो:, न सत्यं वदसि त्वम्। किं श्येन: शिशुं हर्तुं समर्थ: ?'' स आह- ''श्रीमन्त: श्रूयतां मम वचनम्—

तुलां लोहेन घटितां यत्र खादन्ति मूषिकाः।
श्रीमन्, तत्र हरेच्छ्येनो बालकं नात्र संशयः।''

ते राजपुरुषाः अपृच्छन्- ''कथम् एतत्?'' ततः स जीर्णधनः तेषां राजपुरुषाणाम् अग्रे आदितः प्रभृति सर्वं वृत्तान्तम् अकथयत्। तत् श्रुत्वा तैः विहस्य तौ उभौ परस्परं संबोध्य तुला- शिशु- प्रदानेन संतोषितौ।

## शब्दार्थः

घटिता = घड़ी हुई, बनी हुई
अर्जितुम् = (√अर्ज्, तुमुन्) कमाने के लिए, इकट्ठा करने के लिए
देशान्तरम् = अन्य देश को
पूर्वपुरुषोपार्जिता = (पूर्व पुरुष+उपार्जिता) पूर्वजों द्वारा अर्जित
निक्षेपभूता = अमानत रखी हुई
स्नानोपकरणम्=(स्नान +उपकरणम्) स्नान के लिए साधन (तौलिया, साबुन आदि)
पितृव्यः = चाचा
पिधाय = बन्द करके
कोट-पालिका = कोतवाली
प्रत्यर्पय = (प्रति अर्प् लोट्, म. ए.०) वापिस दो

## अभ्यास

१. हिन्दी में उत्तर लिखो—

(क) इस कथा से हमें क्या शिक्षा मिलती है ?

(ख) जीर्णधन दूसरे देश में किस लिए गया?

(ग) जीर्णधन ने बच्चे को कहाँ रखा?

(घ) सिपाहियों के पूछने पर जीर्णधन ने क्या उत्तर दिया?

२. सन्धिच्छेद करो-

प्रत्यवदत्। स्नानार्थम्। नात्र। स्नानोपकरणम्।

३. उचित शब्द चुनकर रिक्त स्थानों की पूर्ति करो—

शिशुं, स्नानार्थम्, श्येनेन, मूषिकैः

(क) सा तु ................भक्षिता

(ख) अहं तावत् ................ नदीं गच्छामि।

(ग) नदी तटात् स -------अपहृत:।

(घ) किं श्येन: ------हर्तुं समर्थ:।

४. अव्ययों का संस्कृत वाक्यों में प्रयोग करो—

एकदा, इदानीम्, भृशम्, अलम्, कथम्।

५. संस्कृत में उत्तर लिखो—

(क) जीर्णधन: क: आसीत्?

(ख) जीर्णधनस्य गृहे का आसीत्?

(ग) श्रेष्ठिन: पुत्र: केन अपहृत:?

✧✧✧✧

## नवदशः पाठः

# सुप्रभातम्

उदयति मिहिरो विदलित-तिमिरो
भुवनं कथमभिरामम्।
प्रचरति-चतुरो मधुकर-निकरो
गुंजति कथमविरामम्॥ १॥
विकसति कमलं, विलसति सलिलं,
पवनो वहति सलीलम्।
दिशि-दिशि धावति कूजति नृत्यति
खग-कुलमतिशय-लोलम्॥२॥
शिरसि तरुणां रवि -किरणानां
खेलति रूचिररुणाभा।
उपरि दलानां हिम-कणिकानां
काऽपि हृदयहर-शोभा॥ ३॥
प्रसरति गगने हरि-हर-भवने
दुन्दुभि- दमदम-नादः।
भज परमेशं, पठ सनिवेशं,
भवतादनुपम-मोदः॥४॥

### शब्दार्थः

मिहिरः = सूर्य
विदलित तिमिरः = अंधकार को दूर करने वाला
अभिरामम् = (वि) सुंदर
मधुकर-निकर : = भौरों का समूह
विलसति = (वि √लस्, लट, प्र. ए.) सुशोभित होता है
सलीलम् = (क्रि. वि.) धीरे-धीरे

अतिशय लोलम् = (वि.) अत्यन्त चंचल

रुचिः = कान्ति

परमेशम् =(परम+ईश) परमेश्वर को

सनिवेशम् =ध्यान-पूर्वक

अनुपम-मोदः= अद्वितीय हर्ष

हरि-हर भवने = हरि-हर (हरि=विष्णु, हर=शिव) के मंदिर में

अरुणाभा = लाल रंग की (कान्ति)

हिम कणिकानाम् = ओस कणों की

हृदय हर-शोभा = मनोहर सुन्दरता

## अभ्यास

१. इस पाठ का सरलार्थ हिन्दी में लिखो।

२. कोष्ठक में दिए गए शब्दों में से उपयुक्त शब्द चुन कर रिक्त स्थानों की पूर्ति करो—

(क) मिहिरः ..........। (वहति, उदयति, प्रचरति)

(ख) कमलम् ...............। (गुंजति, कूजति, विकसति)

(ग) पवनः ...............। (खेलति, नृत्यति, वहति)

३. उपसर्ग अलग करो—

अभिरामम्, सुप्रभातम्, प्रचरति, अनुपमः।

४. संस्कृत में उत्तर लिखो-

(क) कमलं कदा विकसति?

(ख) खगकुलं कुत्र नृत्यति?

(ग) दुन्दुभि-दमदम-नादः कुत्र प्रसरति?

❖❖❖❖

# विंशः पाठः

# संस्कृतस्य महत्त्वम्

भारतम् एकं विशालं राष्ट्रम् अस्ति। अस्मिन् राष्ट्रे बहवः प्रदेशाः सन्ति। एषु प्रदेशेषु विभिन्नानां भाषाणां व्यवहारः भवति। एतासु भाषासु हिन्दी, पंजाबी, गुजराती, मराठी, बंगला, अन्याः च अनेकाः भाषाः मुख्याः सन्ति। संस्कृत-भाषा प्रायः सर्वासाम् एतासां भाषाणां जननी अस्ति। इयं भारतवर्षस्य प्राचीनतमा भाषा अस्ति। न केवलं भारतवर्षे प्रत्युत अखिले संसारे प्रचलितासु भाषासु इयं प्राचीनतमा अस्ति।

संस्कृत भाषा प्राचीने भारते लोक-भाषा राज-भाषा च आसीत्। अस्यां भाषायां भारतस्य प्राचीनतमं साहित्यं लिखितम् अस्ति। भारतस्य इदं प्राचीनतमं साहित्यं विश्व साहित्यस्य प्राचीनतमं रूपम् उपस्थापयति। अस्य साहित्यस्य प्राचीनतमः ग्रन्थः ऋग्वेदः अस्ति। ऋग्वेदः यजुर्वेदः, सामवेदः, अथर्ववेदः इति चत्वारः वेदाः, अथ च एकादश उपनिषदः, रामायणं, महाभारतं, भगवद्गीता, अष्टादश पुराणानि, षड् दर्शनानि, अन्यानि अनेकानि शास्त्राणि ग्रन्थ-रत्नानि च अस्य साहित्यस्य गौरवं वर्धयन्ति। वाल्मीकिः, व्यासः, कालिदासः, अश्वघोषः, भारविः माघः, श्रीहर्षः अन्ये च बहवः कवयः इदं साहित्यं समृद्धं कुर्वन्ति। भासः, भवभूतिः विशाखदत्तः, राजशेखरः अन्ये च बहवः नाटककाराः अस्य साहित्यस्य सौन्दर्यं वर्धयन्ति। सुबन्धु-बाण-दण्डि प्रमुखाः गद्यकाराः अपि अस्य शोभां पुष्यन्ति।

संस्कृत साहित्ये भारतस्य संस्कृतिः प्रतिबिम्बिता अस्ति। अस्मिन् साहित्ये भारतस्य पुरातनः इतिहासः सुरक्षितः अस्ति। इदं साहित्यम् अस्माकं धार्मिकं नैतिकं च जीवनम् अपि प्रतिबिम्बयति। एवं इदं साहित्यं अस्माकं सांस्कृतिकः निधिः अस्ति।

इयं भाषा सरला सुबोधा च अस्ति। अस्यां भाषायां वाक्य-विन्यासस्य नियमाः विशेषेण सरलाः सन्ति। शनैः शनैः नियम-पूर्वकम् अभ्यासं कृत्वा बालकः अस्यां भाषायां प्रवीणतां प्राप्तुं शक्नोति। शब्दानां विशालः भण्डारः अस्याः भाषायाः अनन्या विशेषता अस्ति। अस्यां भाषायां शब्द-निर्माणस्य अद्भुता शक्तिः अस्ति। अद्यापि

इयं भाषा पारिभाषिकाणां शब्दानां निर्माणे सहायतां करोति। प्रादेशिकीनां भाषाणां विकासाय समृद्धये च अस्याः भाषायाः महतीम् आवश्यकतां सर्वे अपि स्वीकुर्वन्ति।

संस्कृत-भाषा ललिता मधुरा च अस्ति। अतः एव कश्चित् कविः आह- "भाषासु मधुरा मुख्या दिव्या गीर्वाण-भारती इति" अस्याः भाषायाः माधुर्येण वैदेशिकाः अपि जनाः आकृष्टा अभवन्। ते अस्याः भाषायाः बहुविधं महत्त्वं ज्ञात्वा अस्याः सादरम् अध्ययनम् अकुर्वन्, अद्यापि च कुर्वन्ति। अद्य संसारस्य प्रायः सर्वेषु प्रमुखेषु विश्वविद्यालयेषु संस्कृत-भाषायाः अध्ययनस्य व्यवस्था अस्ति।

संस्कृत-भाषायाः तत्साहित्यस्य च अध्ययनं भारतीयानाम् अस्माकं कृते विशेषेण हितावहम् अस्ति। राष्ट्रीयायाः एकतायाः निष्पादने तत्प्रसार-कर्मणि चापि संस्कृतस्य अध्ययनं सर्वथा सहायकं स्यात् इति न अत्र संदेहः।

## शब्दार्थः

उपस्थापयति = (उप √स्था, प्रेरणार्थक णिच्, लट्) प्रस्तुत करता है, पेश करता है

वर्धयन्ति = (√वृध् प्रेरणार्थक णिच् लट्, प्र. ब.) बढ़ाते हैं।

पुरातनः =प्राचीन

अनन्या = निराली

गीर्वाण-भारती = देव भाषा, संस्कृत

हितावहम् = हितकर, लाभप्रद

प्रोत्साहयति = उत्साहित करती है

निधिः = खजाना

प्रवीणताम् = निपुणता को

## अभ्यास

१. हिन्दी में उत्तर लिखो:

(क) संस्कृत के किन्हीं चार कवियों अथवा नाटककारों के नाम लिखो।

(ख) वेद कितने हैं? उनके नाम लिखो।

२. कोष्ठक में दिए गए शब्दों में उचित विभक्ति लगाकर वाक्य बनाओ—

(क) संस्कृत-भाषा सर्वासाम् एतासां (भाषा) जननी अस्ति।

(ख) अस्मिन् साहित्ये (भारत) पुरातनः इतिहासः सुरक्षितः अस्ति।

(ग) संसारस्य प्रमुखेषु (विश्वविद्यालय) संस्कृत-भाषाया: अध्ययनस्य व्यवस्था अस्ति।

३. अव्ययों का संस्कृत वाक्यों में प्रयोग करें-

अद्य, सर्वथा, एवम्, अत्र।

४. प्रत्यय अलग करो :-

कृत्वा, प्राप्तुम्, ज्ञात्वा।

५. संस्कृत में उत्तर लिखो-

(क) भारतम् कीदृशं राष्टम् अस्ति?

(ख) सर्वासाम् भाषाणां जननी का अस्ति?

(ग) संस्कृत-भाषा कीदृशी अस्ति?

❖❖❖❖

# एकविंश: पाठ:

# स्वामी रामतीर्थ:

भारतवर्षस्य सुप्रसिद्ध: वेदान्तज्ञ: स्वामी रामतीर्थ: पश्चिम-पंजाब राज्ये गुजरांवाला प्रदेशे 1873 तमे ईसाब्दे अजायत। स बाल्यात् एव मेधावी, प्रतिभावान् च आसीत्। पाठशालायाम् अध्यापका: तस्य प्रतिभया, स्मरण-शक्तया च अत्यन्तं प्रभाविता: आसन्। अल्पेन एव कालेन स उर्दू- फारसी -भाषयो: प्रवीणतां प्राप्तवान्। तत: स संस्कृत-भाषाम् अपि अपठत्। असाधन: तस्य जनक: तस्य उच्च-शिक्षाया: प्रबन्धं कर्तुम् असमर्थ: आसीत्। परं तस्य अपूर्वां मेधां, ज्ञान रुचिं च दृष्ट्वा केचित् श्रेष्ठिन: धनेन तस्य सहायताम् अकुर्वन्।

अल्पै: एव साधनै: जीवन-निर्वाहं कुर्वन् रामतीर्थ: पूर्णेन मनो-योगेन उच्च-शिक्षाम् अध्यगच्छत्। स बी. ए. परीक्षायां विश्वविद्यालये प्रथमं स्थानं प्राप्तवान्। तत: स गणित-विषये एम. ए. परीक्षाम् उत्तीर्य लवपुरे क्रिश्चियन् महाविद्यालये प्राध्यापक: अभवत्।

रामतीर्थ: शैशवात् एव एकान्त प्रिय:, चिन्तन-शील: च आसीत्। धार्मिक-कथासु तस्य महती रुचि: आसीत्। श्रीकृष्णे तस्य दृढा भक्ति: आसीत्। यदा स **स्वामी** विवेकानन्दस्य सम्पर्कं प्राप्तवान, तदा तस्य प्रभावेण स वेदान्तस्य अध्ययने प्रवृत: अभवत् । अनन्तरं वेदान्ते पारङ्गत: स अध्यापन-वृत्तिं परित्यज्य वेदान्तस्य प्रचाराय परिव्राजक: अभवत्। स वेदान्तस्य, भारतीय संस्कृते: च प्रचारं कर्तुम् अमरीका-जापानादीन् देशान् अपि अगच्छत्।

स्वामी रामतीर्थ: देशभक्त: आसीत्। भारतम् अचिरम् एव स्वतंत्रं, समृद्धं च भविष्यति इति तस्य दृढ: विश्वास: आसीत्। रामतीर्थ: कोमल-हृदय:, भावुक: च आसीत्। भावुकताया: क्षणेषु स काव्य-रचनाम् अपि अकरोत् । तस्य कवितासु अपूर्व: भावावेग: अस्ति।

स्वामी रामतीर्थ: सर्वम् अपि जगत् ईश्वरमयम् अपश्यत्। तस्य प्रकृति-प्रेम अनन्यम् आसीत्। अनेकदा स प्रकृते: शोभां दृष्ट्वा भाव-विह्वल: अजायत। एवं भाव-विह्वल: भूत्वा स 1906 तमे ईसाब्दे गंगायां शाश्वतं जल-समाधिम् अकरोत्।

## शब्दार्थः

वेदान्तज्ञः = वेदान्त दर्शन का विद्वान्
बाल्यात् = बचपन से
मेधावी = तीव्र बुद्धि वाला
अपूर्वाम् = अनोखी (मेधा) को
मनोयोगेन = मन की एकाग्रता के साथ
भाव-विह्वल = भावना पूर्ण, अत्यन्त भावुक
उत्तीर्य = (उद् √तृ, क्त्वा > ल्यप्) उत्तीर्ण करके, पास करके
जल-समाधिम्= जल में समाधि अर्थात् ईश्वर लीनता की स्थिति को, मृत्यु को
पारंगत = कुशल, विद्वान्, पण्डित

भावुकः = भावना पूर्ण, भावावेग से युक्त
भावावेग = भावों का प्रबल वेग अथवा प्रवाह
असाधनः = साधन धन आदि से रहित
ईश्वरमयम् = ईश्वर से परिव्याप्त, ईश्वर रूप
अनेकदा=अनेक बार
अध्यगच्छत् = (अधि √गम>गच्छ, लङ् प्र. ए.) प्राप्त की
शाश्वतम् = नित्य, चिरन्तन (जल समाधि) को
परिव्राजकः = संन्यासी

## अभ्यास

१. हिन्दी में उत्तर लिखो।-

(क) स्वामी रामतीर्थ उच्च शिक्षा प्राप्त करने में कैसे सफल हुए?

(ख) रामतीर्थ कौन-कौन सी भाषाओं के ज्ञाता थे?

(ग) रामतीर्थ ने नौकरी क्यों छोड़ी?

२. उपसर्ग अलग करो-

परित्यज्य, प्रभावेण, विश्वासः, सुप्रसिद्धः

३. प्रत्यय अलग करो।-

दृष्ट्वा, कर्तुम्, श्रुत्वा, भूत्वा

४. कोष्ठकों में दिए गए शब्दों में उपयुक्त विभक्ति, वचन लगाकर रिक्त स्थानों की पूर्ति करो-

(क) अल्पेन एव .......(काल) सः उर्दू-फारसी भाषायोः प्रवीणतां प्राप्तवान्।

(ख) रामतीर्थः .......(शैशव) एकांतप्रियः आसीत्।

(ग) स..................(वेदान्त) अध्ययने प्रवृतः अभवत्।

(घ) सः वेदान्तस्य प्रचारं कर्तुम् अमरीका-जापानादीन्.........(देश) अगच्छत्।

५. संस्कृत में उत्तर लिखो-

(क) स्वामी रामतीर्थः कुत्र अजायत?

(ख) रामतीर्थः कस्य विषयस्य अध्यापकः आसीत्?

(ग) भावुकतायाः क्षणेषु रामतीर्थः किम् अकरोत्।

✧✧✧✧

## द्वाविंश: पाठ:

# गीतामृतम्

तमुवाच हृषीकेश:, प्रहसन्निव, भारत।
सेनयोरुभयोर् मध्ये विषीदन्तमिदं वच: ॥
देहिनोऽस्मिन् यथा देहे कौमारं, यौवनं, जरा।
तथा देहान्तर-प्राप्तिर् धीरस् तत्र न मुह्यति ॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥

नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावक:।
न चैनं क्लेदयन्त्यापो, न शोषयति मारुत: ॥

हतो वा प्राप्स्यसि स्वर्गं, जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय, युद्धाय कृत निश्चय: ॥

सुख-दु:खे समे कृत्वा, लाभालाभौ, जयाजयौ।
ततो युद्धाय युज्यस्व, नैवं पापमवाप्स्यसि ॥

दु:खेष्वनुद्विग्नमना:, सुखेषु विगतस्पृह:।
वीतरागभयक्रोध: स्थितधीर् मुनिरुच्यते ॥

ध्यायतो विषयान् पुंसः, सङ्गस् तेषूपजायते।
सङ्गात् संजायते कामः, कामात् क्रोधोऽभिजायते॥

क्रोधाद् भवति संमोहः, संमोहात् स्मृति-विभ्रमः।
स्मृति- भ्रंशाद् बुद्धिनाशो, बुद्धिनाशात् प्रणश्यति॥

यद् यदाचरति श्रेष्ठस्, तत् तदेवेतरो जनः।
स यत् प्रमाणं कुरुते, लोकस् तदनुवर्तते॥

यदा यदा हि धर्मस्य ग्लानिर् भवति, भारत।
अभ्युत्थानमधर्मस्य, तदात्मानं सृजाम्यहम्॥

परित्राणाय साधूनां, विनाशाय च दुष्कृताम्॥
धर्म-संस्थापनार्थाय संभवामि युगे युगे॥

## शब्दार्थः

हृषीकेशः = (हृषीक + ईशः) इन्द्रियों का स्वामी (कृष्ण)

प्रहसन् = **(प्र० √हस्, शतृ, पुं०)** मुस्कराते हुए

विषीदन्तम् = **(वि √सद्, शतृ, पुं०, द्वि, ए.)** दुःखी होते हुए को

देहिनः = देहधारी अर्थात् जीवात्मा के

वीतरागभयक्रोधः = नष्ट हुए लगाव, डर तथा क्रोध वाला

वासांसि = कपड़ों को

विहाय = (वि √हा, क्त्वा,> ल्यप्) छोड़कर

संयाति = (सम् √या लट्, प्र. ए.) प्राप्त करता है ।

छिन्दन्ति = काटते हैं

क्लेदयन्ति= गीला करते हैं

शोषयति = सुखाता है

देहान्तर-प्राप्तिः = दूसरे शरीर की प्राप्ति

ग्लानिः = हानि, ह्रास

दुष्कृताम् = बुरे कार्य करने वालों का

## अभ्यास

१. हिन्दी में उत्तर लिखो—

(क) ईश्वर कब अवतरित होता है?

(ख) जीवात्मा शरीर कैसे बदलता है?

(ग) शरीर और आत्मा में क्या भेद है?

२. सन्धिच्छेद करो—

लाभालाभौ। क्लेदयन्त्यापः। दुःखेष्वनुद्विग्नमनाः। तदात्मानम्। धीरस्तत्र। तस्मादुत्तिष्ठ ।

३. रिक्त स्थानों की पूर्ति करो —

(क) नैनं छिन्दन्ति............।

(ख) जित्वा वा भोक्ष्यसे....................।

(ग) नैनं ............पावकः।

(घ) क्रोधाद् भवति.........................।

✧✧✧✧

## त्रयोविंश: पाठ:

# महाराजा रणजीत सिंह:

पञ्चापस्य वीरप्रसू- भूमौ महाराज्ञो रणजीतसिंहस्य नाम 'शेर-ए-पंजाब' रूपेण जना: सादरं स्मरन्ति। तस्य जन्म ख्रिष्टाब्दस्य 1780 तमे वर्षे 'सुकरचकिया' मिसलस्य सरदारस्य महासिंहस्य गृहे अभवत्। तस्य मातु: नाम राजकौर: आसीत्। सा तस्य नाम बुधसिंह: इति अकरोत्। महासिंह: रणक्षेत्रे तस्य जन्मन: सूचनां प्राप्तवान्। तत्र विजयं प्राप्य स: तस्य नाम 'रणजीतसिंह:' इति अकरोत्।

1792 तमे ईसाब्दे तस्य जनक: स्वर्गं प्राप्त:। तदा अल्पायु: अपि स: मिसलकार्यं योग्यतया अपूरयत्। 1796 तमे ईसाब्दे स: कन्हैया मिसलस्य महताबकौर नामक: कन्यया सह परिणय-सूत्रे बद्ध:।

तदा पञ्चाप: द्वादशमिसलेषु विभक्त: आसीत्। वैदेशिकानाम् आक्रमणै: लुण्ठनै: च पञ्चापस्य आर्थिक अवस्था जर्जरा अभवत्। रणजीत सिंह: 1799 तमे ईसाब्दे मिसलभेदान् दूरीकृत्य संयुक्तस्य पञ्चाप-राज्यस्य स्थापनाम् अकरोत्। 1801 तमे ईसाब्दे स: लाहौरवासिभि: 'महाराजा' पदेन विभूषित:। 1802 तमे ईसाब्दे स: लाहौरम् अधिकृत्य सिक्खराज्ये समायोजयत् 'शेर-ए-पञ्जाब' इति पदवीं च अधारयत्। 1809 तमे ईसाब्दे तावत् तस्य राज्यं लद्दाखात् सिन्धपर्यन्तम्, सतलुजनद्या: खैबर दर्रा पर्यन्तं प्रसरितम् आसीत्।

प्रजापालक: रणजीतसिंह: रात्रिकाले वेशं परिवर्त्य असहाय-जनानां सहायतां करोति स्म। स: धर्म-जात्यादीनां भेदान् विस्मृत्य मानवमात्रस्य कल्याणार्थं कार्यम् अकरोत्। तस्य सेनानायकौ अकाली फूलासिंह: हरिसिंह: नलवा च मुगलानां आक्रमणानि निष्फलानि अकुरुताम्। स: जनहितरतान् जनान् विदुष: च धन-धान्येन पूरयति स्म। स: दुष्टानां सम्पत्तिं हृत्वा निर्धनेषु वितरति स्म।

महाराजोऽयं प्रजापालक: दीनदयालु:, न्यायप्रिय:, प्रजा-वत्सल:, कुशल:

प्रशासकः, वीरः, योद्धा च आसीत्। 1839 तमे ईसाब्दे सः देवलोकं गतः । धन्यः स महाराजः रणजीतसिंहः।

## शब्दार्थः

अल्पायुः = छोटी आयु
परिणयसूत्रे= विवाह-बन्धन में
लुण्ठनैः = लूटों द्वारा
जर्जरा = कमजोर
प्रजावत्सलः प्रजा के लिए प्रिय
दूरीकृत्य = दूर करके
विभूषितः =सुशोभित किया
अधिकृत्य = अधिकार करके
समायोजयत् = मिला लिया
परिवर्त्य = बदलकर
विस्मृत्य = भुलाकर
हृत्वा = हर कर
वितरति स्म = बाँटते थे।

## अभ्यास

१. हिन्दी में उत्तर लिखो :-

(क) महाराजा रणजीत सिंह जी के माता-पिता का क्या नाम था?

(ख) पंजाब की आर्थिक अवस्था जर्जर कैसे हुई?

(ग) महाराजा रणजीत सिंह का राज्य कहाँ से कहाँ तक फैला हुआ था?

२. यथा निर्दिष्ट वचन परिवर्तन करें :-

अधारयत् (बहुवचन में), आसीत् (द्विवचन में), अपूरयत् (बहुवचन में) अभवत् (द्विवचन में)

३. कोष्ठक में दिए गए शब्दों में उचित विभक्ति लगाकर रिक्त स्थानों की पूर्ति करें–

(क) महासिंहः.............(रणक्षेत्र) तस्य जन्मनः सूचनां प्राप्तवान्।

(ख) सः .............(लाहौर) अधिकृत्य सिक्खराज्ये समायोजयत्।

(ग) सः ..............(दुष्ट) सम्पत्तिं हृत्वा निर्धनेषु वितरति स्म।

(घ) 1839 तमे ईसाब्दे सः..............(देवलोक) गतः।

४. नीचे लिखे अव्यय शब्दों का संस्कृत वाक्यों में प्रयोग करें-

धिक्, अधुना, ह्यः श्वः, अनन्तरम्।

५. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखो-

(क) महाराजा रणजीत सिंहस्य जन्म कदा अभवत्?

(ख) महाराजा रणजीतसिंहः कैः महाराजा पदेन विभूषितः?

(ग) महाराजा रणजीत सिंहः कीदृशः प्रशासकः आसीत्?

✧✧✧✧

# चतुर्विंश: पाठ:

# कश्मीर यात्रा

कश्मीर-प्रदेश: भारत-वर्षे रमणीयतम: प्रदेश: अस्ति। भारतस्य पश्चिमोत्तरे दिग्विभागे, हिमालयस्य अंके स्थित: अयं प्रदेश: गिरि-शिखरै: परिवृत: अस्ति। प्रतिवर्षं ग्रीष्मर्तौ देशस्य विभिन्न प्रदेशेभ्य:, देशान्तरेभ्य: च अनेके पर्यटका:, प्रकृति-सौन्दर्यं द्रष्टुम् अत्र आगच्छन्ति।

गत-वर्षे वयं ग्रीष्मावकाशे कश्मीर-यात्रां कर्तुं चण्डीगढ़ात् सायं रेल-यानेन प्रस्थिता:। अन्येद्यु: प्रात: वयं जम्मू नगरं प्राप्तवन्त: । तत: मोटर-यानेन श्रीनगराय प्रस्थाय, मार्गे अति दीर्घां जवाहर-सुरंगाम् अतिक्रम्य, वयं कश्मीरस्य मनोहराम् उपत्यकां प्रविष्टा:। मार्गम् उभयत: रम्याणि दृश्यानि अवलोकयन्त: वयं द्वादशभि: होराभि: श्रीनगरं प्राप्नुवाम। श्रीनगरं वितस्ता-नदीम् उभयत: स्थितम् अस्ति।

कश्चित् कालं पर्यटक-केन्द्रे विश्रम्य वयं डल-सरोवरस्थे एकस्मिन् रमणीये नौका-गृहे निवासं कृतवन्त: । तत: प्रतिदिनं कदाचित् स्थानीय-बस-यानेन, कदाचित् च पादाभ्यां निशात-शालिमारादीनि उपवनानि, चश्माशाही - नामकं शीतलं जलोद्गमम्, शङ्कराचार्यस्य च प्रसिद्धं मंदिरं पश्यन्त: सुखेन कतिपयानि दिनानि अनयाम।

श्रीनगरात् वयम् अनन्तनागम्, अच्छबलम्, अन्यानि च धार्मिक-स्थानानि, कुक्कुटनामकं च स्वास्थ्यप्रदं निर्झर-स्थलम् दृष्टुं गता:। तत: लम्बोदरी (लुडर) नदी तटे स्थितं स्वच्छतमं पहलगाम-नगरं प्राप्ता: अस्मात् स्थानात् अमरनाथं प्रति यात्रा आरभ्यते। पहलगामात् प्रत्यागत्य वयं सोनमार्गं गता:। तदनन्तरम् अखिलभवान्या: मन्दिरस्य दर्शनय अगच्छाम। मार्गे वूलर नामक: विश्व-प्रसिद्ध सरोवर: अपि अस्माभि दृष्ट। गुलमर्गे शाद्वल-विभूषितानि गोल्फ-क्रीडा-क्षेत्राणि दृष्ट्वा वयम् अमन्दम् आनन्दं प्राप्नुवाम। इत: निकटवर्तिनि खिलनमर्गे हिम-क्रीडाभि: मनोरंजनम् अपि कृतम्।

देवदार - चिनार-वृक्षै: सुरभितं पवनम् आस्वादयन्त:, निर्झराणां च शीतलं जलं पिबन्त: वयम् एकं मासं सुखेन कश्मीरे विश्रम्य, विमानेन स्वनगरं प्रत्यागता:।

सत्यम् कश्मीर: पृथिव्यां स्वर्ग-खण्ड: इव स्थित:।

## शब्दार्थः

| | |
|---|---|
| अङ्के = गोद में | अतिक्रम्य = पार करके |
| परिवृत्तः = घिरा हुआ | उपत्यका = पर्वतों से घिरी भूमि, वादी |
| ग्रीष्मर्तौ = (ग्रीष्म + ऋतौ) गर्मी के मौसम में | वितस्ता = जेहलम नदी |
| देशान्तरेभ्यः = दूसरे देशों से | शाद्वल = हरी घास के मैदान |
| पर्यटकाः =सैलानी | सुरभितम् = सुगन्धित |
| अन्येद्युः = दूसरे दिन | निर्झराणाम् = झरनों का |
| प्रस्थाय = रवाना होकर | |

## अभ्यास

१. हिन्दी में उत्तर लिखो-

(क) कश्मीर में किस ऋतु में लोग अधिक जाते है ?

(ख) कश्मीर के कोई चार दर्शनीय स्थान बताओ।

(ग) गुलमर्ग की क्या विशेषता है ?

(घ) कश्मीर के किसी धार्मिक स्थान का नाम बताओ।

२. अव्ययों को संस्कृत वाक्यों में प्रयोग करो-

अन्येद्युः, प्रातः, उभयतः, इव, प्रति।

३. रिक्त स्थानों की पूर्ति करो—

(क) नौकागृहे ...............कृतवन्तः।

(ख) अस्मात् स्थानात् अमरनाथं प्रति ........., आरभ्यते।

(ग) तदनन्तरम् अखिलभवान्याः मन्दिरस्य ..........अगच्छाम।

(घ) सत्यम्, कश्मीरः पृथिव्यां..........इव स्थितः।

४. संस्कृत में उत्तर लिखो-

(क) कश्मीरः प्रदेशः कुत्र स्थितः अस्ति ?

(ख) कस्मात् स्थानात् अमरनाथं प्रति यात्रा प्रारभ्यते ?

(ग) कः प्रदेशः पृथिव्यां स्वर्गखण्डः इव स्थितः ?

✧✧✧✧

# पञ्चविंशः पाठः

# मनु-वचनानि

एतद्-देश-प्रसूतस्य सकाशाद् अग्र-जन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व-मानवाः॥

वेदः स्मृतिः, सदाचारः, स्वस्य च प्रियमात्मनः।
एतत् चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥

सत्यं ब्रूयात्, प्रियं ब्रूयाद्, न ब्रूयात् सत्यमप्रियम्।
प्रियं च नानृतं ब्रूयाद्, एष धर्मः सनातनः॥

दृष्टि-पूतं न्यसेत् पादं, वस्त्र पूतं जलं पिबेत्।
सत्य-पूतां वदेद् वाचं, मनः पूतं समाचरेत्॥

यद् यत् पर-वशं कर्म, तत् तद् यत्नेन वर्जयेत्।
यद् यद् आत्म-वशं तु स्यात्, तत् तत् सेवेत यत्नतः॥

सर्वं पर वशं दुःखं सर्वम् आत्म-वशं सुखम्।
एतद् विद्यात् समासेन लक्षणं सुख-दुःखयोः॥

अभिवादन-शीलस्य, नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्, विद्या यशो, बलम्॥

तृणानि भूमिरुदकं, वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥

यथा यथा हि पुरुषः शास्त्रं समधिगच्छति।
तथा तथा विजानाति, विज्ञानं चास्य रोचते।

यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥

## शब्दार्थः

एतद्-देश-प्रसूतस्य = इस देश में उत्पन्न (विद्वान् ब्राह्मण) का

अग्रजन्मनः = ब्राह्मण का

शिक्षेरन् = (शिक्ष्, विधिलिङ्, प्र. ब.) (वे) सीखें

सनातनः = पुरातन, परंपरागत

न्यसेत् = (नी √अस्, विधिलिङ्, प्र. ए.) (वह) रखे

वर्जयेत् = छोड़ दे

विद्यात् = (विद्, जानना, विधिलिङ्, प्र.ए.) (वह) जाने

समासेन = संक्षेप से

तृणानि = तिनकों से बना आसन, अर्थात् आसन

सुनृता = मधुर (वाणी)

न उच्छिद्यन्ते = (उद् √छिद्, कर्म वाच्य लट्, प्र.ब.) उच्छिन्न अथवा नष्ट नहीं होते

पूज्यन्ते =(स्त्रियाँ) सम्मानित होती हैं

देवताः = देव अर्थात् देव गुणों से संपन्न मनुष्य

अफलाः= निष्फल (क्रियाएँ)

## अभ्यास

१. हिन्दी में उत्तर लिखो-

(क) मनु के अनुसार धर्म का चतुर्विध लक्षण क्या है?

(ख) मनु के अनुसार अभिवादन शील व्यक्ति को प्राप्त होने वाले लाभों का वर्णन करो।

(ग) इस पाठ के पद्यों में से किन्हीं तीन को कण्ठस्थ करो।

२. निम्नलिखित रिक्त स्थानों की पूर्ति करो—

(क) न ब्रूयात् सत्यम् .....................।

(ख) वस्त्र पूतं .............पिबेत्।

(ग) यत्र नार्यस्तु पूज्यन्ते ................. तत्र देवताः।

३. सन्धिच्छेद करो-

वृद्धोपसेविन् । एतान्यपि। नोच्छिद्यन्ते। नार्यस्तु। सर्वास्तत्र। यत्रैताः।

४. उपसर्ग अलग करो-

अभिवादनम्, विजानाति, उपसेविनः, समाचरेत् ।

## षड्विंशः पाठः

# विज्ञानस्य चमत्काराः

विज्ञानं पदार्थानां विशिष्टं ज्ञानम् अस्ति। अस्मिन् मनुष्याणां, पशूनां, वनस्पतीनां, भौतिक-पदार्थानां च विषये ज्ञानं निहितं भवति। विज्ञानेन मनुष्यस्य जीवनम् सुखमयं कष्ट-रहितं च भवति। अद्यतनं युगम् वैज्ञानिकं अस्ति। यत्र यत्र अस्माकं दृष्टिः गच्छति, तत्र तत्र वयं विज्ञानस्य चमत्कारान् पश्यामः।

प्राचीन काले संसारे यातायातस्य साधनानि स्वल्पानि आसन्। ग्रामान्तरं नगरान्तरं वा गन्तुं जनाः अश्वस्य उष्ट्रस्य, रथस्य वा वाहन-रूपेण उपयोगं कुर्वन्ति स्म। अधुना द्विचक्रिकाः, मोटर-यानानि, रेलयानानि, पोताः, विमानानि, अन्यानि च विविधानि यातायात-साधनानि सुलभानि सन्ति। विमानेन जनाः अल्पेन एव कालेन आकाश-मार्गेण सुदूरं प्राप्नुवन्ति। राकेट-यानेन अन्तरिक्ष-यात्रिणः चन्द्रलोकम् अपि प्राप्ताः। कालेन च ते मंगल-ग्रहं, शुक्र-ग्रहं, च अपि गन्तुं समर्थाः स्युः।

विज्ञानेन अधुना संचारस्य नवानि साधनानि सुलभानि जातानि। दूरभाषेण दूरे स्थिताः अपि पुरुषाः परस्परं वार्तालापं कुर्वन्ति। रेडियो-यन्त्रेण स्वदेशे, विदेशेषु च अपि समाचाराः, गीतानि, भाषणानि च प्रसार्यन्ते। दूर-दर्शने तु वक्तुः चित्रम् अपि दृष्टिगोचरं भवति। अनेन वयं नृत्यं, नाटकम्, अन्यानि च विविधानि दृश्य-श्रव्य-वस्तूनि प्रत्यक्षीकुर्मः।

विद्युतः शक्तिः विज्ञानस्य महत्वपूर्णः आविष्कारः अस्ति। अनेन आविष्कारेण अस्माकं जीवन-चर्यायां महत् परिवर्तनं संजातम्। रात्रेः अन्धकारः अनेन पूर्णतः वशीकृतः। अद्य नगरेषु, ग्रामेषु च विद्युद्-दीपाः प्रायः सर्वत्र द्योतन्ते। यदा वयं शीतम् अनुभवामः, तदा विद्युत्तापकेन शीतं निवारयामः। वयं ग्रीष्मकाले विद्युद्-व्यजनैः, प्रशीतकैः च गृहाणि शीतलानि कुर्मः। विद्युतः शक्त्या विविधानि यन्त्राणि संचलन्ति।

चिकित्सायाः क्षेत्रे अपि विज्ञानं वरदानम् अस्ति। अद्य शल्य-क्रियया एक्सरे-यन्त्रेण, नव नवैः च औषधैः असाध्यानाम् अपि रोगाणाम् उपचारः सम्भवः अस्ति। पेन्सिलीन सदृशैः, औषधैः, सूचि-वेधद्वारा, कोटिशः व्याधिग्रस्ताः नीरोगाः भवन्ति।

किं बहुना? यत्र अपि अस्माकं दृष्टिः गच्छति, तत्र एव वयं विज्ञानस्य चमत्कारान् पश्यामः।

## शब्दार्थः

विशिष्टम् = विशेष
यातायातम् = आवगमन, आना-जाना
विद्युत तापकेन = बिजली के हीटर से
वार्तालापम् = बातचीत को
प्रसार्यन्ते =(रेडियो पर) प्रसारित किए जाते हैं
दूर-दर्शनम् = टेलीविज़न
जीवन-चर्यायाम् = दैनिक जीवन में
दूरभाषेण = टेलिफ़ोन से
सुलभानि = आसानी से प्राप्त
विद्युत्-दीपाः = बिजली के लैंप
संचारः = संदेश-प्रेषण
प्रशीतकम् = कूलर
चिकित्सायाः= इलाज के
शल्य-क्रिया = ऑप्रेशन द्वारा
उपचारः = इलाज

## अभ्यास

१. हिन्दी में उत्तर लिखोः-
   (क) विज्ञान किसे कहते हैं? इससे हमें क्या लाभ हुआ है?
   (ख) विज्ञान ने हमें यातायात के कौन से नये साधन दिए हैं?
   (ग) विज्ञान के चमत्कार इस विषय पर एक नोट लिखो।
२. कोष्ठकों में दिए गए शब्दों में से उपयुक्त शब्द चुनकर रिक्त स्थानों की पूर्ति करो-
   (क) यत्र ............दृष्टिः गच्छति, तत्र विज्ञानस्य चमत्कारान् पश्यामः।
   (अस्मासु, अस्माकं, वयं)
   (ख) विद्युतः शक्त्या विविधानि यन्त्राणि ................।
   (गच्छन्ति, संभवन्ति, संचलन्ति)
   (ग) औषधैः असाध्यानाम् अपि ................उपचारः भवति।
   (साधनानां, चमत्काराणां, रोगाणां)
   (घ) दूर-भाषेण दूरे स्थिताः जनाः ............... कुर्वन्ति।
   (परिवर्तनं, वार्तालापं, आविष्कारं)
३. अव्ययों का संस्कृत में वाक्यों में प्रयोग करोः-
   अधुना, यत्र, तत्र, वा, च।
४. संस्कृत में उत्तर लिखो।
   (क) विज्ञानेन मानवस्य जीवनं कीदृशं भवति?
   (ख) दूरे स्थिताः जनाः केन यन्त्रेण वार्तालापं कुर्वन्ति?
   (ग) जनाः केन साधनेन आकाशमार्गेण सुदूरं गच्छन्ति?

❖❖❖❖

# सप्तविंशः पाठः

# भारत-कोकिला सरोजिनी

कोकिल-कण्ठा, कवयित्री, सुवक्त्री, राष्ट्रनेत्री, श्रीमती सरोजिनी नायडूः परम-गुणवती महिला आसीत्। सा हैदराबाद-नगरे जन्म अलभत्। तस्याः पिता अघोरनाथः परम मेधावी आसीत्। स वैज्ञानिकः, अनेक भाषाविज्ञः, कविः च आसीत्। तस्याः माता अपि अनेक-भाषासु पारंगता आसीत्।

सरोजिनी विलक्षणया प्रतिभया सम्पन्ना आसीत्। द्वादश-वर्ष-देशीया एव सा मैट्रिक-परीक्षाम् उदतरत्। त्रयोदश-वर्ष देशीया तु सा आङ्गल-भाषायाः मनोरमाम् एकां कविताम् अरचयत्। षोडशे वर्षे प्राप्ते सा उच्च-शिक्षाम् अधिगन्तुम् आङ्गल-देशम् अगच्छत्। आत्मनः कवित्व-प्रतिभया, मधुरया गिरा, सदाचार-गुणैः च सा तत्र आङ्गल-प्राध्यापकानां बहुमता अभवत्।

स्वदेशं प्रत्यागत्य महात्मा-गान्धिनः प्रभावेण सा भारतस्य स्वतंत्रता-संग्रामे भागम् अगृह्णात। लवण-सत्याग्रह-समये सा तेन सह अत्यन्तं सहयोगम् अकरोत्।

भारतीय-स्त्रीणाम् उद्बोधनाय अपि सा सततम् अयतत। सा भारतीय-महिला सम्मेलनस्य प्रधान-पदम् अपि अलंकृतवती।

सर्वाः जातयः, सर्वे सम्प्रदायाः सर्वे च वर्गाः तस्याः कृते समानाः आसन्। तेषां भेदे सा विश्वासं न अकरोत्। स्वयं सा विजातीयेन युवकेन सह विवाहं कृतवती। हरिजनानाम् उन्नतये अपि सा निरन्तरं यत्नम् अकरोत्।

तस्याः कवि प्रतिभा अनेकासु सुन्दर- कवितासु प्रकटी-भूता । भाषण-कलायाम् अपि सा अति-दक्षा आसीत्। कोकिला इव सा निजेन-मधुरेण कण्ठ-स्वरेण श्रोतॄन् मुग्धान् अकरोत्। अतः जनैः सा 'भारत कोकिला' इति अभिधानेन विभूषिता।

1947 तमे ईसाब्दे भारते स्वतन्त्रे जाते, श्रीमति सरोजिनी नायडूः उत्तर-

प्रदेशस्य राज्यपाल-पदम् अवहत्। 1949 -तमे ईसाब्दे भारत-कोकिलायाः मधुरः कण्ठ स्वरः सर्व-कालाय विरामम् अगच्छत्।

## शब्दार्थः

कोकिल-कण्ठा = कोयल के समान (मधुर) गले वाली

मेधावी = बुद्धिमान्

विलक्षण = अद्‌भुत

गिरा = वाणी से

बहुमता = बहुत आदृत

उद्‌बोधनाय = जागृति के लिए

विरामम् अगच्छत् = रुक गया, बन्द हो गया

मुग्ध = मस्त

अभिधानेन = नाम से

पारंगतः = निपुण

अवहत् = (√वह् लङ् प्र., ए.,)वहन किया, धारण किया

सर्वकालाय = सदा के लिए

श्रोतृन् = सुनने वालों को

## अभ्यास

१. हिन्दी में उत्तर लिखो -

(क) सरोजिनी नायडू को और किस नाम से जाना जाता है ?

(ख) सरोजिनी ने समाज सुधार के क्या-क्या काम किए ?

(ग) सरोजिनी की विलक्षण प्रतिभा के दो उदाहरण दो।

(घ) भारत की स्वतंत्रता के बाद सरोजिनी ने किस पद को संभाला?

२. रिक्त स्थानों की पूर्ति करो—

(क) सा मधुरेण ......................श्रोतृन् मुग्धान् अकरोत्।

(ख) सा भारतीय-महिला-सम्मेलनस्य ................. अलंकृतवती।

(ग) सर्वे वर्गाः तस्याः कृते ............... आसन्

३. यथानिर्दिष्ट लकार-परिवर्तन करो

(क) सा प्राध्यापकानां बहुमता अभवत्। (लृट् में)

(ख) तस्याः पिता कविः आसीत्। (लट् में)

(ग) सा आंग्ल-देशम् अगच्छत् । (लृट् में)

४. संस्कृत में उत्तर लिखो-

(क) सरोजिनी नायडूः कुत्र जन्म अलभत?

(ख) सरोजिन्याः पितुः नाम किम् आसीत्?

(ग) सरोजिनी नायडूः कस्मिन् सत्याग्रहे गान्धिना सह सहयोगम् अकरोत्?

(घ) सरोजिनी नायडूः कस्य प्रदेशस्य राज्यपालपदम् अवहत् ?

✧✧✧✧

## अष्टाविंश: पाठ:

# यक्ष-युधिष्ठिरयो: संवाद:

यक्ष: केनस्विच्छ्रोत्रियो भवति? केनस्विद् विदन्ते महत्?
केनस्विद् द्वितीयवान् भवति? राजन् केन च बुद्धिमान्?

युधि० श्रुतेन श्रोत्रियो भवति, तपसा विन्दते महत्।
धृत्या द्वितीयवान् भवति, बुद्धिमान् वृद्ध-सेवया॥

यक्ष: किं स्विद् गुरुतरं भूमे: ? किंस्विद् उच्चतरं च खात्?
किंस्विच्छीघ्रतरं वायो: ? किंस्विद् लघुतरं तृणात्?॥

युधि० माता गुरुतरा भूमे: खात् पितोच्चतरस्तथा।
मन: शीघ्रतरं वाताद्, अर्थी लघुतरस् तृणात्।

यक्ष: किंस्वित् प्रवसतो मित्रं? किंस्विन् मित्रं गृहे सत: ?
आतुरस्य च किं मित्रं? किंस्विन् मित्रं मरिष्यत: ?

युधि० सार्थ: प्रवसतो मित्रं, भार्या मित्रं गृहे सत:।
आतुरस्य भिषक् मित्रं, दानं मित्रं मरिष्यत:॥

यक्ष: किंस्विद् एको विचरते? जात: को जायते पुन: ?
किंस्विद् हिमस्य भैषज्यं? किंस्विद् आवपनं महत्?

युधि० सूर्य एको विचरते, चन्द्रमा जायते पुन:।
अग्निर्हिमस्य भैषज्यं, भूमिरावपनं महत्॥

यक्ष: किं नु हित्वा प्रियो भवति? किं नु हित्वा न शोचति?।
किं नु हित्वाऽर्थवान् भवति? किं नु हित्वा सुखी भवेत्?॥

युधि० मानं हित्वा प्रियो भवति, क्रोधं हित्वा न शोचति?।
कामं हित्वाऽर्थवान् भवति, लोभं हित्वा सुखी भवेत्॥

यक्ष: क: शत्रुर् दुर्जय: पुसां ? कश्च व्याधिरनन्तक: ?
कीदृशश्च स्मृत: साधु: ? असाधु: कीदृश: स्मृत: ?॥

युधि० क्रोध: सुदुर्जय: शुत्रर्, लोभो व्याधिरनन्तक:।
सर्व-भूत-हितरत: साधुर् असाधुर्निर्दय: स्मृत:॥

## शब्दार्थ:

श्रोत्रिय: = विद्वान्
महत् = महत् पद, उच्च पद
अर्थवान् = धनवान्, धनी
कामम् = इच्छा को
अनन्तक: = अन्त रहित, असाध्य
सर्व-भूत-हित: = सभी प्राणियों का हित करने वाला
आतुरस्य = रोगी का
आवपनम् = क्षेत्र, स्थान
हित्वा = (√हा, क्त्वा) छोड़कर, त्याग कर
द्वितीयवान् = दूसरे (साथी) से युक्त
खात् = ख अर्थात् आकाश से
लघुतरम् = अधिक हल्का
अर्थी = भिखारी, याचक
प्रवसत: = प्रवासी अथवा विदेश गए (व्यक्ति) का
भिषक् = वैद्य

## अभ्यास

१. हिन्दी में उत्तर लिखो?

(क) युधिष्ठिर के अनुसार किन पदार्थों का त्याग करके मनुष्य क्रमश: लोकप्रिय, शोकरहित, धनवान् एवं सुखी बनता है?

(ख) युधिष्ठिर के अनुसार साधु और असाधु का क्या लक्षण है? मोह और आलस्य किसे कहते हैं?

(ग) संसार में धरती से अधिक भारी, आकाश से अधिक ऊंचा, वायु से अधिक वेगवान् और तिनके से अधिक हल्की वस्तु क्या है?

(घ) इस पाठ में से किन्हीं दो पद्यों को कण्ठस्थ करो।

२. कोष्ठक में दिए गए शब्दों में से उपयुक्त शब्द लेकर रिक्त स्थानों की पूर्ति करो-

(क) श्रुतेन............भवति (श्रोत्रिय:, बुद्धिमान्)।

(ख) ...............शीघ्रतरं वायो: (जलम्, ज्योति:, मन:)।

(ग) ............... एको विचरते (चन्द्र:, वायु:, सूर्य:)।

(घ) कामं हित्वा ............भवति (सुखी, प्रिय:, अर्थवान्)।

३. निम्नलिखित में सन्धि-विच्छेद करो-

पितोच्चतर:। हित्वार्थवान्। कीदृशश्च। मानस्तु। आत्माभिमानिता।

४. अव्ययों का संस्कृत वाक्यों में प्रयोग करो-

पुन:, किम्, शीघ्रम्, सर्वत्र।

✧✧✧✧

# नवविंशः पाठः

## भारतम्

एशिया–महाद्वीपस्य दक्षिण–भागे स्थितः विस्तृतः भू–भागः भारतम् अस्माकं देशः। अस्मिन् देशे बहवः रम्याः प्रदेशाः, हिमालयादयः तुङ्गाः पर्वताः, गङ्गाद्याः च सुजलाः नद्यः सन्ति। अत्र खलु रामः, कृष्णः, महावीरः, बुद्धः, शङ्कराचार्यः, चैतन्यः, कबीरः, नानकः, दयानन्दः, विवेकानन्दः, अन्ये च बहवः महापुरुषाः अभवन्। ते स्वकीयैः चरितैः अस्य देशस्य संस्कृतेः निर्माणम् अकुर्वन्। केचित् महापुरुषाः सागराणाम् अपि पारं गत्वा इमां संस्कृतिं प्रासारयन्।

परस्परं द्वेष–कारणात्, संघ–शक्तेः च अभावात् अयं देशः परतंत्रतां गतः। बहूनां संघर्षाणाम् अन्ते 1947 तमे ईसाब्दे अगस्त मासस्य पंचदशे दिवसे अयं देशः स्वतंत्रः अभवत्, पुनरपि च स्वकीयं गौरवम् अलभत्। एतत् तु महात्मा–गान्धिनः, जवाहरलाल–नेहरोः, सरदार पटेलस्य, लालबहादुर–शास्त्रिणः, अन्येषां च नेतृणां सततस्य परिश्रमस्य फलम्। स्वतंत्रता–संग्रामे लाजपतरायः, भगत सिंहः अन्ये च बहवः देश–वीराः स्वप्राणान् अपि अत्यजन्। इमे राष्ट्र वीराः अस्माकं श्रद्धां सम्मानं च अर्हन्ति।

साम्प्रतं वयं भारतस्य नव–निर्माणे संलग्नाः स्मः। प्रतिवर्षं विद्यालयानां, महाविद्यालयानां, चिकित्सालयानां, शिल्पोद्योगानां च संख्या वर्धते। विद्युद्- दीपाः, राजमार्गान्, जनस्थानानि, गृहाणि च प्रकाशयन्ति। कुल्यानां नलकूपानां च जलं क्षेत्राणि सिंचति, शस्य- श्यामलानि च करोति।

स्वतंत्रम् अस्माकं राष्ट्रं प्रजातंत्रात्मकम् अस्ति। अत्र हि शासनं सर्व–जनहिताय अस्ति। सम्प्रति वयं देश–निर्माण कार्ये सोत्साहं व्यापृताः स्याम इति सर्वेषाम् अपि अस्माकं परमं पवित्रं च कर्त्तव्यम् अस्ति।

### शब्दार्थः

रम्याः = सुन्दर, आकर्षक

तुङ्गाः = ऊँचे

सुजलाः = सुन्दर जल वाली (नदियाँ)

प्रासारयन् = फैलाया, प्रसारित किया

जनस्थानानि = सार्वजनिक स्थानों को

कुल्यानाम् = नहरों का

शस्य श्यामलानि = फसलों से हरे-भरे (खेतों को)

नलकूपाः = ट्यूबवैल

प्रजातन्त्रात्मकम् = प्रजातंत्र पर आधारित

शिल्पोद्योगानाम् = शिल्पों और उद्योगों का

सोत्साहम् = उत्साह-पूर्वक

व्यापृताः स्याम = (हम) लग जाएं

## अभ्यास

१. हिन्दी में उत्तर लिखो-

(क) हमारा देश किस महाद्वीप में स्थित है ?

(ख) भारत के किन्हीं पांच महापुरुषों के नाम लिखो।

(ग) देश की स्वतंत्रता के लिए जिन महापुरुषों ने अपने प्राण भी दे दिए, उनमें से किन्हीं दो के नाम लिखो।

२. कोष्ठक में से उचित शब्द चुनकर रिक्त स्थान की पूर्ति करो-

(क) अस्मिन् देशे तुङ्गा.......... सन्ति। (नद्यः, पर्वताः, पुरुषाः)

(ख) केचित्.................. सागराणाम् अपि पारं गत्वा इमां संस्कृतिं प्रासारयन्। (बालाः, महापुरुषाः)

(ग) अद्य........................स्वतंत्राः स्मः। (अहम्, आवाम्, वयम्)

३. सन्धि विच्छेद करो-

क. हिमालयादयः, शिल्पोद्योगाः, विद्यालयः।

(ख) धातु और प्रत्यय अलग अलग करके लिखो-

गत्वा, पठित्वा, दृष्ट्वा, पीत्वा।

४. निम्नलिखित वाक्यों को शुद्ध करो-

(क) एतत् तु नेतृणां परिश्रमस्य फलानि।

(ख) अत्र सुजला नदी सन्ति।

(ग) प्रतिवर्षं विद्यालयानां संख्या वर्धन्ते।

५. संस्कृत में उत्तर लिखो

(क) अस्माकं देशः कुत्र स्थितः अस्ति ?

(ख) अस्माकं देशे के महापुरुषाः अभवन् ?

(ग) स्वतन्त्रम् अस्माकं राष्ट्रं कीदृशम् अस्ति ?

✧✧✧✧

## त्रिंश: पाठ:

# अन्त्याक्षरी

अद्य: रम्य: दिवस:। गगने मेघा विचरन्ति। मेघै: आच्छन्न: सूर्य: न तपति। सुरम्य:, पवन: मन्दं मन्दं वहति। छात्रा: विद्यालयस्य प्रांगणे सम्मिलन्ति। अद्य तेषां बाल-सभा भवति। मंचे मुख्याध्यापक:, अध्यापका: च उपविशन्ति। अन्त्याक्षरी-प्रतियोगितायै अष्ट छात्रा: तेषां दक्षिण-भागे, अष्ट च तेषां वाम-भागे तिष्ठन्ति। पर्यायेण उभयो: वर्गयो: एकैक: छात्र: एकैक: श्लोकं सस्वरं गायति। पूर्व श्लोकस्य अन्तिम: अक्षर: अपरश्लोकस्य आदौ प्रयुक्त: भवति। सर्वे छात्रा: कुतूहलेन आकर्णयन्ति।

राजवीर: अविचार्य न वक्तव्यं, वक्तव्यं सुविचारितम्।
ननु तत्रैव वक्तव्यं, यत्रोक्तं सफलं भवेत्॥ (त)

सर्वे छात्रा: अहहा! अहहा! पुनरपि, पुनरपि पठ।
(राजवीर: तम् एव श्लोकं पुन: पठति)

राजेश:(त) त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च, सखा त्वमेव।
त्वमेव विद्या च द्रविणं त्वमेव,
त्वमेव सर्वं मम, देव, देव॥ (व)

राकेश:(व) विद्या विवादाय, धनं मदाय,
शक्ति: परेषां परिपीडनाय।
खलस्य, साधो: विपरीतमेतद्
ज्ञानाय, दानाय च रक्षणाय॥ (य)

दिनेश: (य) यथा देशस्तथा वेष:, यथा राजा तथा प्रजा।
यथा क्षेत्रं तथा सस्यं, यथा बीजं तथा फलम्॥ (ल)

आलोक:(ल) लोभो मूलं विनाशस्य, लोभात् कामो विवर्धते।
कामात् क्रोधस्, ततो मोह:, मोहाद् लोको विनश्यति॥ (त)

विवेक:(त) ''तैलाद् रक्षेद्, जलाद् रक्षेद्, रक्षेत् शिथिल-बन्धनात्।
मूर्ख-हस्ते न दातव्यम्'', एवं वदति पुस्तकम्॥ (क)

शशांक:(क) कोऽतिभार: समर्थानां किं दूरं व्यवसायिनाम्।
को विदेश: सविद्यानां, क: पर: प्रिय-वादिनाम्॥ (न)

सुवीर:(न) नास्ति विद्या-समो बन्धु, न च सत्य-सम: सखा।
नास्ति रोग-समं दुखं, न च त्याग-समं सुखम्॥ (ख)

लोकेश:(ख) खल: सर्षप-मात्राणि परच्छिद्राणि पश्यति। (त)
आत्मनो बिल्व मात्राणि पश्यन्नपि न पश्यति।

प्रकाश:(त) तास्तु वाच: सभा:योग्या:, याश्चित्ताकर्षण क्षमा:।
मित्रामित्र-तटस्थानां, ज्ञानाज्ञानवतामपि। (प)

प्रदीप: (प) पुस्तकस्था तु या विद्या, पर हस्त- गतं धनम्।
कार्यकाले समुत्पन्ने, न सा विद्या, न तद् धनम्॥ (न)

सन्दीप:(न) न कश्चिदपि जानाति, किं कस्य श्वो भविष्यति।
अत: श्व: करणीयानि कुर्यादद्यैव सन्मति॥ (त)

नीरज:( त) तस्य संकुचिता बुद्धि: घृत बिन्दुर्यथा जले।
यो न संचरते देशान्, पण्डितान् सेवते न य:। (य)

प्रवीर:(य) यस्तु संचरते देशान्, सेवते यश्च पण्डितान्।
तस्य बुद्धिर्विकसिता, तैल-बिन्दुर्यथा जले॥ (ल)

प्रबोध:(ल) लभ्यन्ते पुरुषा: राजन्, सततं प्रियवादिन:।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभ:॥ (भ)

राजसिंह:(भ) भ्रमरा: रसमिच्छन्ति, व्रणमिच्छन्ति मक्षिका:।
सज्जना: गुणमिच्छन्ति दोषमिच्छन्ति दुर्जना:।

## शब्दार्थ:

अन्त्याक्षरी = यह दो व्यक्तियों या दो वर्गों में बारी बारी से एक-एक श्लोक को उच्चारण करने की ऐसी प्रतियोगिता है, जिसमें पहले श्लोक का अंतिम अक्षर

दूसरे श्लोक के आदि में प्रयुक्त होता है, दूसरे श्लोक का अन्तिम अक्षर तीसरे श्लोक के आदि में, तीसरे का अन्तिम अक्षर चौथे के आदि में, इसी प्रकार यह क्रम अंत तक जारी रहता है। इस प्रतियोगिता में श्लोक के अंतिम व्यंजन को ही प्रायः लिया जाता है, स्वर, अनुस्वार (हलन्त् ) और विसर्ग को नहीं। अंतिम अक्षर पर आधारित होने से इस प्रतियोगिता को अन्त्याक्षरी कहते हैं।

## शब्दार्थः

रम्यः = सुहावनी
आच्छन्नः = ढका हुआ
पश्यन्नपि =(पश्यन् अपि) देखते हुए भी
दक्षिण = दाएं
वाम = बाएं
पर्यायेण = बारी से
कुतूहलेन = उत्सुकता से
विवाद = बहस
मद = घमण्ड
खल = दुष्ट
सस्यम् = फसल
मूलम् = जड़
मोहः = अज्ञान
संकुचिता = सीमित, सिकुड़ी हुई
संचरते = भ्रमण करता है
अप्रिय = कड़वा
पथ्य = हितकर
परच्छिद्राणि = दूसरे के दोषों को

बिल्व–मात्राणि=बिल्व के फल जितने बड़े
सम्मिलन्ति = **इकट्ठे होते हैं**
मञ्चे = स्टेज पर
वाचः = वचन
चित्ताकर्षण-क्षमाः= मन को आकर्षित करने वाले
मित्रामित्र = मित्र और शत्रु
तटस्थ = न मित्र न शत्रु, बेलाग
श्वः = आने वाला कल
श्वः करणीयानि = कल को किए जाने वाले काम
कुर्यादद्यैव = (कुर्यात् अद्य एव) आज ही कर लेवें
व्यवसायी = परिश्रमी
प्रियवादी = मीठा बोलने वाला
सर्षप-मात्राणि = सरसों, जितने, बहुत छोटे
वक्ता = बोलने वाला
व्रण = फोड़ा

## अभ्यास

१. हिन्दी में उत्तर लिखोः-

(क) सज्जन अपनी विद्या, धन और शक्ति किस काम में लगाता है ?

(ख) पुस्तक अपने साथ कैसा व्यवहार चाहती है ?

(ग) बुद्धि के विकास के लिए क्या करना चाहिए ?

२. रिक्त स्थानों की पूर्ति करोः-

यथा देशः तथा ........ ।

यथा राजा तथा ............... ।

यथा ...............तथा फलम् ।

नास्ति रोग-समं................. ।

३. कोई दो श्लोक कण्ठस्थ करो।

४. अव्ययों का संस्कृत वाक्यों में प्रयोग करो-

अतः, श्वः, ननु, यथा, तथा।

५. सन्धिच्छेद करो-

अद्यैव। यस्तु। नास्ति। कश्चिदपि। तत्रैव।

# व्याकरण-भागः

**वर्ण** - उच्चारण की सबसे छोटी इकाई को वर्ण कहते हैं। संस्कृत में कुल उनचास वर्ण हैं। उनमें से तेरह स्वर हैं और छत्तीस व्यंजन हैं। स्वरों के उच्चारण में जिह्वा को मुख में किसी स्थान पर लगाना नहीं पड़ता। परन्तु व्यंजन के उच्चारण में जिह्वा का कोई भाग मुख के अन्दर किसी स्थान पर स्पर्श करता है, अथवा होंठ परस्पर स्पर्श करते हैं। इन वर्णों का वर्गीकरण इस प्रकार किया जाता है :

**स्वर**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ह्रस्व स्वर | अ | इ | उ | ऋ | ऌ | | | |
| दीर्घ स्वर | आ | ई | ऊ | ॠ | ए | ऐ | ओ | औ |

**व्यंजन**

**स्पर्श व्यंजन**

| | | | | | |
|---|---|---|---|---|---|
| **कवर्ग** | क | ख | ग | घ | ङ |
| **चवर्ग** | च | छ | ज | झ | ञ |
| **टवर्ग** | ट | ठ | ड | ढ | ण |
| **तवर्ग** | त | थ | द | ध | न |
| **पवर्ग** | प | फ | ब | भ | म |
| **अन्तःस्थ व्यंजन** | य | र | ल | व | |
| **उष्म व्यंजन** | श | ष | स | ह | |

**अयोगवाह व्यंजन :** ं (अनुस्वार), ँ (अनुनासिक)

ः (विसर्ग)

# सन्धि

दो वर्णों के अत्यन्त समीप बोले जाने पर, उनका एक दूसरे पर प्रभाव पड़ता है। उनके इस परस्पर मेल से उनमें कुछ परिवर्तन हो जाता है। इसे सन्धि कहते हैं। यह तीन प्रकार की है-

**१. स्वर-सन्धि :** जब स्वर का मेल स्वर के साथ हो।

**२. व्यंजन संधि :** जब व्यंजन का मेल स्वर या व्यंजन के साथ हो।

**३. विसर्ग-सन्धि :** जब विसर्ग का मेल स्वर या व्यंजन के साथ हो।

## स्वर सन्धि

### १. दीर्घ सन्धि

(क) अ या आ + अ या आ = दोनों मिल कर दीर्घ आ

(ख) इ या ई + इ या ई = दोनों मिलकर दीर्घ ई

(ग) उ या ऊ+उ या ऊ =दोनों मिलकर दीर्घ ऊ

(घ) ऋ या ॠ + ऋ या ॠ= दोनों मिलकर दीर्घ ॠ

**उदाहरण**

| | | |
|---|---|---|
| (क) | च + अपि = चापि | तथा + अपि = तथापि |
| | हिम = आलयः = हिमालयः | दया + आनन्द = दयानन्द |
| (ख) | अपि + इदम् = **अपीदम्** | कवि + ईश्वरः = कवीश्वरः |
| | मही + इन्द्रः = महीन्द्रः | मही + ईश = महीशः |
| (ग) | स + उक्तिः = सूक्तिः | सिन्धु + ऊर्मि = सिन्धूर्मिः |
| | वधू + उत्सवः = वधूत्सवः | भू + ऊर्ध्वम् = भूर्ध्वम् |
| (घ) | पितृ + ऋणम् = पितॄणम् | मातृ + ऋणम् = मातॄणम् |
| | पितृ + ऋद्धि = पितॄद्धि | मातृ + ऋद्धि = मातॄद्धि |

### २. गुण सन्धि

(क) अ या आ + इ या ई = दोनों मिलकर एक ए

(ख) अ या आ +उ या ऊ = दोनों मिलकर एक ओ

(ग) अ या आ + ऋ या ॠ = दोनों मिलकर एक अर्

उदाहरण-

(क) देव + इन्द्रः = देवेन्द्रः महा + इन्द्रः = महेन्द्रः
नर + ईशः =नरेशः महा + ईशः = महेशः

(ख) हित + उपदेशः = हितोपदेशः महा + उत्सवः = महोत्सवः
एक + ऊनः = एकोनः गंगा + ऊर्मिः = गंगोर्मिः

(ग) राज + ऋषिः = राजर्षिः वसन्त + **ऋतुः = वसन्तर्तुः**
महा + ऋषिः = महर्षिः वर्षा + ऋतुः = वर्षर्तुः

## ३. वृद्धि-सन्धि

(क) अ या आ + ए या ऐ = दोनों मिलकर ऐ

(ख) अ या आ + ओ या औ = दोनों मिलकर एक औ

उदाहरण

(क) एक + एकः = एकैकः सदा + एव = सदैव

(ख) भारत + ऐक्यम् = भारतैक्यम् महा + ऐश्वर्यम् = **महैश्वर्यम्**

(ग) गंगा + ओघः = गंगौघः महा + ओषधम् = महौषधम्

## ४. यण् सन्धि

(क) इ या ई + कोई भिन्न स्वर = केवल पूर्व स्वर को य्

(ख) उ या ऊ + कोई भिन्न स्वर = केवल पूर्व स्वर को व्

(ग) ऋ या ॠ + कोई भिन्न स्वर = केवल पूर्व स्वर को र्

उदाहरण

(क) यदि + अपि = यद्यपि नदी + एषा = नद्येषा
प्रति + उपकारः = प्रत्युपकारः देवी + आह = देव्याह

(ख) मधु + एतत् = मध्वेतत् साधु + अपि = साध्वपि
भू + आदिः = भ्वादिः वधू + इच्छा = वध्विच्छा

(ग) पितृ + आदेशः = पित्रादेशः मातृ + आज्ञा = मात्राज्ञा
भ्रातृ + इच्छा = भ्रात्रिच्छा कर्तृ + आदिः = कर्त्रादिः

## ५. अयादि-सन्धि

(क) ए + कोई स्वर = पूर्व स्वर को अय्

(ख) ऐ + कोई स्वर = पूर्व स्वर को आय्

(ग) ओ + कोई स्वर = पूर्व स्वर को अव्

(घ) औ+कोई स्वर = पूर्व स्वर को आव्

**उदाहरण**

| | | |
|---|---|---|
| (क) | ने + अति = नयति | ने + अनम् = नयनम् |
| | कवे + ए = कवये | मुने + ए = मुनये |
| (ख) | गै + अति = गायति | गै + अनम् = गायनम् |
| | गै = अक: = गायक: | रै + ए = राये |
| (ग) | भो + अति = भवति | भो + अनम् = भवनम् |
| | साधो + ए = साधवे | गो + ए = गवे |
| (घ) | पौ + अक: =पावक: | नौ + इक: = नाविक: |
| | द्वौ + अपि = द्वापि | नौ + औ = नावौ |

## व्यंजन संधि

### 1. खर् विधि

| | | | | |
|---|---|---|---|---|
| वर्गों के तीसरे वर्ण ग्, ज्, ड्, द्, ब् | + | वर्गों के पहले या दूसरे वर्ण (क्, ख्, च्, छ्, ट्, ठ्, त्, थ्, प्, फ् या श्, ष्, स्) | = | पूर्व वर्ण को अपने वर्ग का पहला वर्ण (क्, च्, ट्, त्, प्,) |

**उदाहरण**

अद् + ति = अत्ति　　　　शरद् + कथा = शरत्कथा।

विपद् + पतति = विपत् पतति।　　　　हद् + कम्पते = हत् कम्पते।

### २. जश् विधि

| | | | | |
|---|---|---|---|---|
| वर्गों के पहले वर्ण (क्, च्, ट्, त्, प्) | + | स्वर, वर्गों के तीसरे, चौथे वर्ण, (य् , र्, ल् ,व् , ह्) | = | पूर्व वर्ण को अपने वर्ग का तीसरा वर्ण (ग्, ज्, ड्, द्,ब्) |

**उदाहरण**

| | |
|---|---|
| वाक् + ईश: = वागीश: | ईदृक् + एव = ईदृगेव |
| जगत् + ईश: = जगदीश: | तत् + एव = तदेव |
| सत् + गति: = सद्गति: | सत् + धर्म = सद्धर्म |
| सम्राट् + राजते = सम्राड् राजते | अच् + अन्त: = अजन्त: |

## ३. ङम् विधि

| | | |
|---|---|---|
| वर्गों के पहले या तीसरे वर्ण (कग, चज, टड, तद, पब) | किसी वर्ग का + पाँचवाँ वर्ण (ङ, ञ, ण, न, म) | = पूर्व वर्ण को अपने वर्ग का पाँचवाँ वर्ण (ङ ञ, ण, न, म) |

**उदाहरण**

| | |
|---|---|
| वाक् + मयम् = वाङ्मयम् | षट् + मुख: = षण्मुख: |
| उत् + नति: = उन्नति: | जगत् + नाथ = जगन्नाथ: |
| तद् + मय: = तन्मय: | सम्पद् +न: = सम्पन्न: |

## ४. श्चुत्व विधि

स, तवर्ग, + श, चवर्ग = पूर्व वर्ण को क्रमश: श चवर्ग

**उदाहरण-**

| | |
|---|---|
| रामस् + शान्त: = रामश्शान्त: | पुनस् +च = पुनश्च |
| बालस् + चलति = बालश्चलति | तत् + च = तच्च |
| तद् + जय: = तज्जय: | शत्रुन् + जयति = शत्रूञ्जयति |

## ५. ष्टुत्व विधि

स, तवर्ग + ष, टवर्ग = पूर्व वर्ण को क्रमश: ष टवर्ग।

**उदाहरण**

| | |
|---|---|
| बालस् + षष्ठ: = बालष्षष्ठ: | तस्यास् + टीका = तस्याष्टीका |
| तत् + टीका = तट्टीका | उद् + डीयते = उड्डीयते। |

## ६. लत्व विधि

त, द् + ल् = पूर्व वर्ण को ल्

**उदाहरण**

उत् + लेख: = उल्लेख: उत् + लंघनम् = उल्लंघनम्

तद् + लीन: = तल्लीन: सुहृद् + लाभ: = सुहृल्लाभ:

## ७. णत्व विधि

(क) ऋ, र्, ष् + अपदान्त न = न को ण

(ख) ऋ, र् ष् + स्वर, कवर्ग, पवर्ग, य्, व्, ह्,
अनुस्वार + अपदान्त न = न को ण

**उदाहरण-**

(क) ऋ + नम् = ऋणम् कर् + न: = कर्ण: कृष्+ न = कृष्ण:

(ख) नृपे + न = नृपेण रामे + न रामेण हर्षे + न = हर्षेण

## विसर्ग सन्धि

## १. लोप-विधि

(क) अ + : + कोई भिन्न स्वर = विसर्ग का लोप

**उदाहरण-**

क: + आगच्छति = क आगच्छति बाल: + इच्छति = बाल इच्छति।

अत: + एव = अत एव अर्जुन: + उवाच = अर्जुन उवाच

(क) आ +:+कोई स्वर, वर्गों के तीसरे, चौथे, पाँचवें वर्ण,
य्, र्, ल्, व्, ह् = विसर्ग का लोप

**उदाहरण-**

छात्रा: +आगच्छन्ति = छात्रा आगच्छन्ति बाला: +इच्छन्ति= बाला इच्छन्ति

अश्वा: +धावन्ति = अश्वा धावन्ति नरा: + यान्ति = नरा यान्ति

बाला: + हसन्ति = बाला हसन्ति जना: + गता: = जना गता:

## २. सत्व विधि

: + त्, थ्, स् = विसर्ग को स्

**उदाहरण–**

| | |
|---|---|
| नमः + ते = नमस्ते | बालः + तथा = बालस्तथा |
| सूर्यः + तपति = सूर्यस्तपति | नरः + तरति = नरस्तरति |
| सरलः + थकारः = सरलस्थकारः | बालः + थूत्करोति = बालस्थूत्करोति |
| कृष्ण + सर्पः = कृष्णस्सर्पः | कः + सेवते = कस्सेवते |

## ३. शत्व -विधि

ः + च, छ, श् = विसर्ग को श्

**उदाहरण–**

| | |
|---|---|
| पुनः + च = पुनश्च | बालः + चलति = बालश्चलति |
| मुनिः + छात्रः = मुनिश्छात्रः | तरोः + छाया = तरोश्छाया |
| एकः + शिशुः = एकश्शिशुः | बालः + शेते = बालश्शेते |

## ४. उत्व विधि

(क) अ + ः + अ = विसर्ग को उ,

पूर्व अ और उ मिलकर ओ तथा ओ में पर अ मिलकर ओऽ

**उदाहरण–**

कः + अपि = कोऽपि        बालः + अयम् = बालोऽयम्

(ख) अ + ः + वर्गों के तीसरे, चौथे, पाँचवें वर्ण,

य्, र्, ल्, व् ह् = विसर्ग को उ (अ + उ = ओ)

**उदाहरण–**

| | |
|---|---|
| नरः + गच्छति = नरोगच्छति | अश्वः + धावति = अश्वो धावति |
| शिष्यः + नमति = शिष्यो नमति | देवः + याति = देवो याति |
| बालः + रोदिति = बालो रोदिति | रामः + हसति = रामो हसति |

**नाम पद** – प्राणियों और वस्तुओं के नाम- शब्दों को नाम पद कहते हैं।

**विभक्ति** – किसी नाम पद का सम्बन्ध दूसरे नाम-पद या क्रिया-पद के साथ बताने के लिए, नाम-पद को कई रूप दिए जाते हैं। इन रूपों को आठ वर्गों में विभक्त किया जाता है । अतः इन्हें विभक्ति कहते हैं। इनके विशेष नियम अनुवाद-भाग में उदाहरणों द्वारा समझे जाएंगे। यहाँ पर इन विभक्तियों के नाम और साधारण अर्थ दिए जा रहे हैं।

| विभक्ति का नाम | | साधारण अर्थ |
|---|---|---|
| १. | प्रथमा | ने |
| २. | द्वितीया | को |
| ३. | तृतीया | से, के द्वारा, के साथ |
| ४. | चतुर्थी | के लिए |
| ५. | पंचमी | से (पृथकता के अर्थ में) |
| ६. | षष्ठी | का, के, की |
| ७. | सप्तमी | में, पर |
| ८. | सम्बोधन | हे, रे, अरे |

**वचन** - एक पदार्थ बताने के लिए नाम-पद को एकवचन, दो के लिए द्विवचन और तीन या तीन से अधिक पदार्थ बताने के लिए बहुवचन का रूप दिया जाता है ।

## रूपावली

भिन्न-भिन्न लिंगों के नाम-पदों के रूप सब विभक्तियों और वचनों में नीचे दिए जाते हैं-

## पुंलिंग अकारान्त

### खग = पक्षी

| | एक वचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | खग: | खगौ | खगा: |
| द्वितीया | खगम् | खगौ | खगान् |
| तृतीया | खगेन | खगाभ्याम् | खगै: |
| चतुर्थी | खगाय | खगाभ्याम् | खगेभ्य: |
| पंचमी | खगात् | खगाभ्याम् | खगेभ्य: |
| षष्ठी | खगस्य | खगयो: | खगानाम् |
| सप्तमी | खगे | खगयो: | खगेषु |
| सम्बोधन | हे खग! | हे खगौ! | हे खगा: ! |

### छात्र-विद्यार्थी

| | एक वचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्र० | छात्र: | छात्रौ: | छात्रा: |
| द्वि० | छात्रम् | छात्रौ | छात्रान् |
| तृ० | छात्रेण | छात्राभ्याम् | छात्रै: |
| च० | छात्राय | छात्राभ्याम् | छात्रेभ्य: |
| पं० | छात्रात् | छात्राभ्याम् | छात्रेभ्य: |
| ष० | छात्रस्य | छात्रयो: | छात्राणाम् |
| स० | छात्रे | छात्रयो: | छात्रेषु |
| सं० | हे छात्र ! | हे छात्रौ! | हे छात्रा: ! |

इस शब्द के रूप खग की भाँति हैं। केवल दो रूपों, छात्रेण (३एक०,) छात्राणाम्, (६-बहु०) में णत्व-विधि से न को ण हो जाता है।

**पुंलिंग् इकरान्त**

### कवि = कविता रचने वाला

| | | | |
|---|---|---|---|
| प्र० | कवि: | कवी | कवय: |
| द्वि० | कविम् | कवी | कवीन् |
| तृ० | कविना | कविभ्याम् | कविभि: |
| च० | कवये | कविभ्याम् | कविभ्य: |
| पं० | कवे: | कविभ्याम् | कविभ्य: |
| ष० | कवे: | कव्यो: | कवीनाम् |
| स० | कवौ | कव्यो: | कविषु |
| सं० | हे कवे ! | हे कवी! | हे कवय: ! |

### रवि=सूर्य

| | | | |
|---|---|---|---|
| प्र० | रवि: | रवी | रवय: |
| द्वि० | रविम् | रवी | रवीन् |
| तृ० | रविणा | रविभ्याम् | रविभि: |
| च० | रवये | रविभ्याम् | रविभ्य: |

| | | | |
|---|---|---|---|
| पं० | रवे: | रविभ्याम् | रविभ्य: |
| ष० | रवे: | रव्यो: | रवीणाम् |
| स० | रवौ | रव्यो: | रविषु |
| सं० | हे रवे ! | हे रवी ! | हे रवय: ! |

**पुंलिंग, उकरान्त**

**भानु = सूर्य**

| | | | |
|---|---|---|---|
| प्र० | भानु: | भानू | भानव: |
| द्वि० | भानुम् | भानू | भानून् |
| तृ० | भानुना | भानुभ्याम् | भानुभि: |
| च० | भानवे | भानुभ्याम् | भानुभ्य: |
| पं० | भानो: | भानुभ्याम् | भानुभ्य: |
| ष० | भानो: | भान्वो: | भानूनाम् |
| स० | भानौ | भान्वो: | भानुषु |
| सं० | हे भानो ! | हे भानू ! | हे भानव: ! |

**गुरु = अध्यापक**

| | | | |
|---|---|---|---|
| प्र० | गुरु: | गुरू | गुरव: |
| द्वि० | गुरुम् | गुरू | गुरून् |
| तृ० | गुरुणा | गुरुभ्याम् | गुरुभि: |
| च० | गुरवे | गुरुभ्याम् | गुरुभ्य: |
| पं० | गुरो: | गुरुभ्याम् | गुरुभ्य: |
| ष० | गुरो: | गुर्वो: | गुरूणाम् |
| स० | गुरौ | गुर्वो: | गुरुषु |
| सं० | हे गुरो ! | हे गुरू ! | हे गुरव: ! |

**पुंलिंग ऋकारान्त**

**दातृ = देने वाला**

| | | | |
|---|---|---|---|
| प्र० | दाता | दातारौ | दातार: |
| द्वि० | दातारम् | दातारौ | दातॄन् |

| | | | |
|---|---|---|---|
| तृ० | दात्रा | दातृभ्याम् | दातृभिः |
| च० | दात्रे | दातृभ्याम् | दातृभ्यः |
| पं० | दातुः | दातृभ्याम् | दातृभ्यः |
| ष० | दातुः | दात्रोः | दातॄणाम् |
| स० | दातरि | दात्रोः | दातृषु |
| सं० | हे दातः ! | हे दातारौ ! | हे दातारः ! |

**भ्रातृ = भाई**

| | | | |
|---|---|---|---|
| प्र० | भ्राता | भ्रातरौ | भ्रातरः |
| द्वि० | भ्रातरम् | भ्रातरौ | भ्रातॄन् |
| तृ० | भ्रात्रा | भ्रातृभ्याम् | भ्रातृभिः |
| च० | भ्रात्रे | भ्रातृभ्याम् | भ्रातृभ्यः |
| पं० | भ्रातुः | भातृभ्याम् | भ्रातृभ्यः |
| ष० | भ्रातुः | भ्रात्रोः | भ्रातॄणाम् |
| स० | भ्रातरि | भ्रात्रोः | भ्रातृषु |
| सं० | **हे भ्रातः !** | **हे भ्रातरौ !** | **हे भ्रातरः !** |

**स्त्रीलिंग, आकारांत**

**शाला = घर**

| | | | |
|---|---|---|---|
| प्र० | शाला | शाले | शालाः |
| द्वि० | शालाम् | शाले | शालाः |
| तृ० | शालया | शालाभ्याम् | शालाभिः |
| च० | शालायै | शालाभ्याम् | शालाभ्यः |
| पं० | शालायाः | शालाभ्याम् | शालाभ्यः |
| ष० | शालायाः | शालयोः | शालानाम् |
| स० | शालायाम् | शालयोः | शालासु |
| सं० | हे शाले ! | हे शाले ! | हे शालाः ! |

### गंगा = गंगा नदी

| | | | |
|---|---|---|---|
| प्र० | गंगा | गंगे | गंगा: |
| द्वि० | गंगाम् | गंगे | गंगा: |
| तृ० | गंगया | गंगाभ्याम् | गंगाभि: |
| च० | गंगायै | गंगाभ्याम् | गंगाभ्य: |
| पं० | गंगाया: | गंगाभ्याम् | गंगाभ्य: |
| ष० | गंगाया: | गंगयो: | गंगानाम् |
| स० | गंगायाम् | गंगयो: | गंगासु |
| सं० | हे गंगे ! | हे गंगे ! | हे गंगा ! |

### प्रभा = चमक

| | | | |
|---|---|---|---|
| प्र० | प्रभा | प्रभे | प्रभा: |
| द्वि० | प्रभाम् | प्रभे | प्रभा: |
| तृ० | प्रभया | प्रभाभ्याम् | प्रभाभि: |
| च० | प्रभयै | प्रभाभ्याम् | प्रभाभ्य: |
| पं० | प्रभाया: | प्रभाभ्याम् | प्रभाभ्य: |
| ष० | प्रभाया: | प्रभयो: | प्रभाणाम् |
| स० | प्रभायाम् | प्रभयो: | प्रभासु |
| सं० | हे प्रभे ! | हे प्रभे ! | हे प्रभा: ! |

**स्त्रीलिंग, इकारांत**

### मति =बुद्धि

| | | | |
|---|---|---|---|
| प्र० | मति: | मती | मतय: |
| द्वि० | मतिम् | मती | मती: |
| तृ० | मत्या | मतिभ्याम् | मतिभि: |
| च० | मतये | मतिभ्याम् | मतिभ्य: |
| पं० | मते: | मतिभ्याम् | मतिभ्य: |
| ष० | मते: | मत्यो: | मतीनाम् |
| स० | मतौ | मत्यो: | मतिषु |
| सं० | हे मते ! | हे मती ! | हे मतय: ! |

## रीति =ढंग

| | | | |
|---|---|---|---|
| प्र० | रीतिः | रीती | रीतयः |
| द्वि० | रीतिम् | रीती | रीतीः |
| तृ० | रीत्या | रीतिभ्याम् | रीतिभिः |
